ARCHAEOLOGICAL LIBRARY
TAMIL NADU STATE DEPT. OF ARCHAEOLOGY
MADRAS - 28.

Bulletin

# Raghunāthābhyudaya of Rāmabhadrāmbā

[ A HISTORICAL POEM ]

15 MAR 1972

2798

891·2

EDITED BY

T. R. CHINTAMANI, M. A., Ph. D.

*Senior Lecturer in Sanskrit*

*University of Madras*

TNSDA
02798

00450

UNIVERSITY OF MADRAS

1934

Price Re. 1.] [ Foreign 2s.

# रघुनाथाभ्युदयमहाकाव्यम्

## रामभद्राम्बाविरचितम्

Office of the
Director of Archaeol
Madras

संपादकः

ति. रा. चिन्तामणिः

मद्रपुरीयविश्वविद्यालयः
१९३४

# PREFACE

This edition of the Raghunāthābhyudaya is based upon the copy of the work deposited in the Sarasvati Mahal Palace Library, Tanjore. (No. 3722.) Brahmaśrī S. Subrahmanya Sastrigal of Tanjore, lent me his transcript of the work, on the basis of which this edition was undertaken. Besides placing his transcript at my disposal, he was kind enough to read through the proofs. I take this opportunity to express my grateful thanks to him for having so kindly helped me in this publication.

UNIVERSITY OF MADRAS,
*1st August, 1934.*

T. R. CHINTAMANI.

# FOREWORD

This Epic poem dealing with historical events must be welcome not merely to scholars of Sanskrit Literature but also to students of Indian History. The work shows that the well-known Purāṇas were not the only source for the Indian poets to select their themes from. History interested the ancient Indian talent as much as fiction. History is dealt with in this epic in as fascinating a way as any fiction. The writer of the poem is a lady, which gives additional importance to the work. It is with great pleasure that I introduce this historical poem to the world.

UNIVERSITY OF MADRAS,
*1st August, 1934.*

C. KUNHAN RAJA,
*Reader in Sanskrit.*

Office of the
Director of Archaeology
Madras

# INTRODUCTION

The Raghunāthābhyudaya of Rāmabhadrāmbā was first made known to the world by Dr. S. Krishnaswami Aiyangar in his "Sources of Vijayanagar History" and also by the late lamented T. A. Gopinatha Rao, in the "Madras Christian College Magazine" for 1917; but the work itself was not available in print. This work is important in two respects. First, it is by a lady and secondly it is a historical work. Poetical compositions by ladies are few in Sanskrit literature and fewer still are historical works. The Raghunāthābhyudaya shows distinctive poetical merits and good historical sense. The facts narrated herein are almost all of them borne out by other records. The authoress was a mistress of Raghunātha Nāyaka and had therefore, first-hand information regarding the achievements of Raghunātha. The biography is therefore trustworthy from a historical point of view.

There was a galaxy of gifted and talented ladies in the court of Raghunātha. One of them was Madhuravāṇī, a highly cultured lady, who wrote a compendium of the Rāmāyaṇa. Rāmabhadrāmbā's fame as an authoress seems to have been achieved even in the court of Raghunātha.

* Rāmabhadrāmbā's teacher was one Kāḷayya; and the latter in one of his Telugu works—the Rājagōpālavilāsa—makes a reference to his pupil Rāmabhadrāmbā in the following words:—

ఘటికాశతగ్రంథ ఘటనోత్కటనవీనపాండిత్యగరిమలు భళి యనంగ
ఓష్ఠ్య నిరోష్ఠ్యాదికోద్దామరసగర్భసందర్భ వహా నని సన్నుతింప
మాకందమంజరీ మధురఝరీ మాధుర్య రచనావిశేష మారా యనంగ
పరిహృతేతరయుక్తిభాగనూతనకథా చాతుర్యధుర్యత సన్నుతింప
అయ్యదినముల రామభద్రమ్మవారు । నేయు కృష్ణాజి కవితల నేర్పుమెచ్చి ।
వినికినేయుటెల్ల మీఘనత గాదె । కవివినుతచర్య చెంగల్వకాళనార్య ॥

* I am indebted to Mr. M. Ramakrishna Kavi, M. A., for this information.

These words are put in the mouth of Vijayarāghavanāyaka, the successor of Raghunātha to the throne of Tanjore. The poet voices forth the respect which the members of the royal household had for Rāmabhadrāmbā. Several anecdotes are related regarding the scholarship of Rāmabhadrāmbā. Once the king in full court gave out the following pāda of a verse—किं ते सन्तानपादपायन्ते and asked the ladies assembled to complete it. Rāmabhadrambā seems to have got up at once and completed the verse as follows:—

कति कति नः क्षितिपतयः किं ते रघुनाथनायकायन्ते ।
भुवि बहवः किल तरवः किं ते सन्तानपादपायन्ते ॥

There were other equally gifted and talented ladies but their names are not preserved to us.

The incidents mentioned in the work must have taken place about 1620 A. D., and the date of the composition will fall somewhere near 1625 A. D.

Canto I. This sarga is given to a detailed description of the Coḷadeśa, its inhabitants etc. Reference is made to the many works of Raghunātha.*

Canto II. This sarga gives a fair account of the city of Tanjore, the capital of Coḷadeśa.

Canto III. Raghunātha Nāyaka, the hero of the poem, is portrayed in this sarga.

Canto IV. Some of the details of the daily routine of Raghunātha are set forth. The Kamalāvilāsa—a portion of the palace is said to have contained the audience chamber of the king.

Canto V. The king is on the throne, attended by the kings of Pāṇḍya, Simhala etc. Several princes of the North were present in the court through their representatives. Paṇḍitas well-versed in the various śāstras and poets of eminence were also present.

Canto VI. While the king is in court the bards sing the praises of the king, during which they refer to the ancestry of the king. One of the ancestors of the king was Timma; his queen was Bayyamāmbā. Cevva was their son; he built the big gōpura for the God at Tiruvaṇṇāmalai; at Vṛddhācalam he constructed a gōpura and a dhvajastambha; the steps and the outer wall in the temple at Śrīśaila were built under his orders; on the banks of the Kāverī he built several temples and endowed several agrahārās. Cevva's queen was Murtyambā, sister of the queen Acyutarāya. Prince Acyuta was born to Cevva and Murtyambā. Acyuta too like his father built several temples.

The golden vimāna over the shrine of Śrīraṅganātha at Śrīraṅga was constructed by him; at Rāmeśvara his bounties were many; several dānās, including the tulāpūruṣa were performed by him; and many were the agrahārās that were endowed by him. Acyuta's queen again was known as Murtyambikā. They were for long without any issue and after a good deal of tapas Lord Raghunātha was pleased to favour them with a son of unparalleled greatness and he was Raghunātha, the hero of the poem. Many were the auspicious signs that attended the birth of Raghunātha.

Canto VII. Verses 1-33 describe the personal beauty of Raghunātha Nāyaka in great detail. Acyuta had him married to the daughter of the Pāṇḍya king and then wanted to make him Yuvarāja. The proposal was received with acclamation by the ministers and other officials of the state and the ceremony was duly performed.

About this time Veṅkaṭadevarāya was at war with the Pārasīkas and he was in difficulties regarding the safety of the Karnāṭa empire. He therefore applied to Acyuta and requested him to lend the services of his son Raghunātha. Acyuta offered to come himself with enough men and money but Veṅkaṭa insisted on having Raghunātha, who alone, though young, had the capacity to rout out the Yavanas. At last Acyuta sent Raghunātha with Veṅkaṭa with a large retinue. Raghunātha went to Candragiri and thence to Penugoṇḍa. The enemies of the Karnāṭa country were terrified to hear that Raghunātha was on the scene in defence of the emperor. Many of them took to their heels, though a few put up some resistance. The Murasas in the fortresses at Ballāḷapura and other neighbouring places opposed Raghunātha

but were defeated ignominiously. Raghunātha thus saved the Karnāṭa empire from its enemies.

In the court of Veṅkaṭa, Raghunātha came to understand that the king of Tuṇḍīra, Kṛṣṇapa Nāyaka by name, was suffering untold miseries in prison under the orders of Veṅkaṭa. Raghunātha had him liberated and in gratitude Kṛṣṇapa had his sister married to Raghunātha. With glory and a newly wedded wife Raghunātha set to return to his native place. Acyuta, hearing of the return of his son, went a considerable distance to meet him, and brought him back home.

Canto VIII. Once while Raghunātha was in court there came to him some Brahmans requesting protection from one Colaga who could not be conquered by men like Viṭṭhala, since he had obtained the favour of Bhairava. Colaga was like Rāvaṇa, molesting all people around, carrying away chaste ladies; and countless were his misdeeds. At that moment the king of Nepāḷa along with his relatives was awaiting audience with the king. When he was admitted to the court he narrated the extent to which his ancestors were indebted to Raghunātha's ancestors. Ever since the Paraṅgis came to the island of Nepāḷa they were being repulsed by the kings of Nepāḷa and that was the main cause of enmity between the Paraṅgis and the king of Nepāḷa. They captured the city of the king of Nepāḷa by foul means. He therefore requested the help of Raghunātha in driving away the Paraṅgis. Raghunātha readily consented to help the king of Nepāḷa in getting back his kingdom. While this conversation was going on, there arrived from the court of the Karnāṭa emperor some Brahmans with important

information. They told Raghunātha that Veṅkaṭadevarāya was dead and that his son Śrī Raṅganātha was crowned king. Jaggarāja was against the monarch and one night, along with his younger brother he entered the palace of the king and massacred the entire family of the monarch, women and children included. A washerman was able to save stealthily a young child of the king. Some of the followers of the late king wanted to retaliate on Jaggarāja and they were there to request the help of Raghunātha. The king readily consented to help them and made preparations at once to proceed against Colaga, the Paraṅgis and Jaggarāja. Colaga got afraid of Raghunātha and sought the help of Kṛṣṇapa. Though the ministers of Kṛṣṇapa advised him not to join hands with Colaga against Raghunātha, who was responsible for his release from the prison of Veṅkaṭadevarāya, Kṛṣṇapa did join Colaga. Colaga was secure in an island in the sea, but Raghunātha had a bridge constructed and crossing the sea defeated Colaga, and took him prisoner. The ladies in the harem of Colaga begged for the life of Colaga and in response Raghunātha desisted from killing him, but took him prisoner and confined him to his own jail. Kṛṣṇapa seeing the fate of Colaga fled from the field as fast as his horse could carry him.

Canto IX. After the suppression of Colaga, the king of Nepāḷa reminded the king of his own difficulties. Raghunātha immediately set out towards that kingdom, crossed the seas by the bridge of boats constructed by his engineers, defeated the Paraṅgis completely and restored the lost kingdom to the king of Nepāḷa.

Meanwhile the spies of the king came and told him that in the west the king of the Pāṇḍya and Tuṇḍira have formed a coalition against him. Raghunātha, on hearing this, proceeded against them and met them in battle at Topūr.

Canto X. The combined armies of the Pāṇḍyas and others sustained severe defeat at Topūr and the soldiers ran for their lives. Jaggarāja appeared on the scene and was defeated and ultimately killed with his followers. On the death of Jaggarāja, the lords of Pāṇḍya and Tuṇḍīra disappeared from the field. Rāvilla Veṅka and Mākarāja followed suit. Rāya Dalavāy Ceñca who had never before been in a battle-field fled from the field in sheer fright, on seeing the corpses of the kings. The king of the Pāṇḍyas was ultimately captured but was magnanimously released by Raghunātha. The lord of Tuṇḍīra after his signal defeat at the hands of Raghunātha began to muster forces and start hostilities against him, afresh. Raghunātha was requested by his envoys to send out an army against Kṛṣṇapa, the lord of Tuṇḍīra and he did accordingly. Raghunātha then shifted to Tiruvaiyār, marching along the banks of the Kāverī and there awaited the result of the expedition sent by him. The soldiers who marched against Kṛṣṇapa captured several fortresses like Bhuvanagiri and finally returned victorious. Raghunātha too returned to Tanjore on receipt of this information.

Canto XI. Herein we find a minute description of the accomplishments of the ladies in the court of Raghunātha. They could compose in various languages; could complete any incomplete verse; could compose at the rate of a hundred verses per ghaṭikā; could wield the pen with equal facility

in eight languages; there were some who could expound the Vaiśeṣika and Vyākaraṇa śāstra; there were many who could interpret in a beautiful manner the works of eminent poets; some of them were proficient in what is usually referred to as Rāvaṇahasta. Raghunātha made suitable presents to them.

Canto XII. The accomplishments of the ladies in the matter of dancing and staging dramas are set forth in this canto. The names of several rāgas they sung and the names of dances they danced are also given.

॥ श्रीः ॥

# रघुनाथाभ्युदयकाव्यम्

## श्रीरामभद्राम्बाविरचितम्

---

### प्रथमः सर्गः

---

आनन्दितौ भूमितले हरीशविभीषणौ येन विशिष्य ताभ्याम् ।
नाम्ना च भक्त्या रघुनाथनेतुर्भद्राणि कुर्वीत स रामभद्रः ॥ १ ॥

सदेन्दिरामन्दिरजातरूपपद्मेषु पद्मा युगपत्प्रसन्ना ।
वेषैरशेषैर्वितरेदभीष्टं राज्यादिमं श्रीरघुनाथनेतुः ॥ २ ॥

ऐश्वर्यलब्धातिशयाज्जगत्यां सर्वज्ञताख्यापनतः सहर्षः ।
आशास्यमापादयतात्प्रशस्यं राजावतंसो रघुनाथनेतुः ॥ ३ ॥

महत्तरं प्राप्तवतो महेशादैश्वर्यमद्रीन्द्रसुता स्वयं च ।
रक्षैकताना रघुनाथनेतुः शक्तिं दिशेदादिमशक्तिरग्र्याम् ॥ ४ ॥

परस्परस्पर्धितयेव शक्तिं प्रौढां सदैश्वर्यमपि प्रसूते ।
भागद्वयं यद्वपुषः स पायान्नारीनरात्मा रघुनाथभूपम् ॥ ५ ॥

कपोलदानोदितगन्धलेशादलिप्रवेकानपि वावदूकान् ।
करोति यः सैष करीन्द्रवक्त्रो वाचां प्रपञ्चे वरदो ममास्तु ॥ ६ ॥

कलासु लोकः सकलासु बीजं प्रपञ्चयत्वेष मम प्रबन्धम् ।
इत्येव वाणी रघुनाथनेतुरेतत्कथायां सहकृत्वरी स्यात् ॥ ७ ॥

राजन्ति सर्वे रघुनाथभूपवेषेण देवा विदितप्रभावाः ।
तद्वर्णनेनैव धरातले ते प्रसन्नशीला न कथं भवेयुः ॥ ८ ॥

रसप्रधानान्रघुनाथनेतुः प्रबन्धभेदान्मम भावयन्त्याः ।
प्राङ्निर्मितानेककविप्रबन्धप्रस्तावनायां प्रभवेन्मतिः किम् ॥ ९ ॥

शब्दार्थयोर्मर्म समप्रधानं वशंवदं यस्य वदन्ति सर्वे ।
कृती स एवात्र कृतौ सहायो नाथो मम श्रीरघुनाथनामा ॥ १० ॥

अस्ति प्रभावैरतिमाननीया चोलावनी शालिवनीनिचोला ।
सह्यात्मजापूरसरत्समीरसंपर्कपुण्या जनताशरण्या ॥ ११ ॥

संवर्धिता सह्यसुताम्बुसेकैः कृतज्ञतामात्मनि किं विचार्य ।
तस्याः प्रवृद्धिं तनुते यदीया माकन्दवन्या मकरन्दपूरैः ॥ १२ ॥

शय्याजुषो यत्र सरोजनाभेः पादाब्जमाध्वीपरिणाम एव ।
मरुद्वृधा तत्तटभूमहीजाः स्वादूनि यस्मात्सुवते फलानि ॥ १३ ॥

तटानिलानीततरुप्रसूनान्याशङ्क्य बाणानसमायुधीयान् ।
सरित्पतिः सह्यसुतां तरङ्गैरालिङ्ग्य यस्यां रमतेऽनुवेलम् ॥ १४ ॥

पार्श्वे मदीयं भजतो मुरारेः पादोद्भवा किं नु समा ममेति ।
मरुद्वृधा यत्र मरुन्नदीं तामपाकरोति स्फुटफेनहासैः ॥ १५ ॥

कुचावृतिर्नात्र कुलाङ्गनानामाचार इत्यात्मनि तर्कयित्वा ।
सह्यात्मजा यत्र तथा स्वयं च प्रकाश्य चक्रस्तनभारमास्ते ॥ १६ ॥

यान्ती द्रुतं यत्र वनोपकण्ठमालीसहायेन रसातिरेकात् ।
सह्यात्मजा सिन्धुसमीपमेति मन्दाक्षभारादिव मन्दमन्दम् ॥ १७ ॥

फलं विना जीवनभारभाजा त्वयोन्नतत्वं भ्रियते वृथेति ।
मरुद्वृधा यत्र मरुत्स्रवन्त्यास्तनोति रोधं तटधान्यकूटैः ॥ १८ ॥

समुन्नतत्वं श्रयते जगत्यां मरुत्स्रवन्तीति मरुद्वृधा च ।
उर्व्याः पयःपूरमुदस्य यस्यामभ्यासमाविष्कुरुते तदाप्तुम् ॥ १९ ॥

संप्राप्य यां सह्यसुता सवेगं वप्रेषु कुल्यामुखतो वहन्ती ।
समेति लीलावनशालिपालीगीतप्रभावात्किमु निश्चलत्वम् ॥ २० ॥

कदाचिदन्तः क्वचिदेव मुक्ता धृत्वा प्रतीताजनि ताम्रपर्णी ।
इतीव तीरेषु मणीर्वितत्य हसत्यमूं यत्र कवेरकन्या ॥ २१ ॥

पुरंध्रिका सिन्धुपतेः पुरस्तादारामलक्ष्मीरवलोक्य यस्याम् ।
प्रसूनमुक्ताः परितोऽवकीर्य नीराजयत्यन्तिकनीपदीपैः ॥ २२ ॥

रसालमाध्वीरससारणीभिः कैदारके यत्र कृताम्बुसेके ।
सह्यात्मजायाः सततं वहन्त्याः फलं पयोधेः परिरम्भ एव ॥ २३ ॥

त्रिस्रोतसा या त्रिदिवस्य कीर्तिस्ततोऽप्युदग्रा ध्रियतां मयेति ।
स्रोतःशतैः संततशोभमानां सह्यात्मजां या समवाप कान्ता ॥ २४ ॥

कुमारिकासंपुटिकाविहारानालोक्य यस्यामतिलोभनीयान् ।
सह्यात्मजा भाति सरोरुहोद्यद्दलिप्रकाण्डैरनुकुर्वतीव ॥ २५ ॥

रत्नाकरत्वं रमणे निरीक्ष्य पतिव्रता सह्यभवा स्वयं च ।
अम्भोविहारे हरिणेक्षणानां समेति यस्यां श्लथहाररत्नैः ॥ २६ ॥

अन्यप्रसूनान्यवलोक्य लग्नान्यनोकहेष्वात्तमधुव्रतानि ।
सह्यात्मजायाः सलिलं यदन्तराचक्षते दोहदमन्यदेव ॥ २७ ॥

प्रवर्धयन्ती पयसा निजाङ्के रसालडिम्भान् रमणीयवेषान् ।
आमोदभारोल्लसिताब्जनेत्रमालोकयामास सरिद्यदन्तः ॥ २८ ॥

संवर्धितायाः सरितो मयैव वर्त्मावरुन्द्धे वनपुष्परेणुः ।
तदागमात्प्राक्तमपाकरोमीत्युज्जृम्भ्यते यत्र नभस्वतोच्चैः ॥ २९ ॥

परागजालानि विकीर्य यस्यां गन्धद्विपे गच्छति गन्धवाहे ।
सह्यात्मजा तच्चरमाङ्घ्रिकृष्टविलोललोहान्दुकवेषमेति ॥ ३० ॥

प्रभिन्नपालीभरमौक्तिकाङ्कात्केरद्रुरेखावलिकायमानात् ।
सह्यात्मजां मारुतसौविदल्लो यस्यां नयत्यन्तिकमम्बुराशेः ॥ ३१ ॥

रङ्गस्थले यत्र रसोत्तरङ्गं सह्यात्मजायां सततं नटन्त्याम् ।
रसालवेषा रसिका विलोक्य मुक्ताभिषेकं मुहुराचरन्ति ॥ ३२ ॥

आरोपमाकर्षणमन्तरेण रतीशितुर्यत्र रसालचापाः ।
कुर्वन्ति मुक्ताघुटिकाः क्षिपन्तो मनस्विहृत्सीम्नि समाधिरोधम् ॥ ३३ ॥

रतेः सहायो रघुनाथनेत्रा जितो यतस्तेन तदीयचापः ।
आम्राधरैर्यत्र जनैरमुष्य निष्पीड्यते नीरसमेव यन्त्रे ॥ ३४ ॥

आद्यन्तयोर्नैकरसश्छदोऽस्याप्यसिप्रसूतिर्गगनं प्रसूनम् ।
इतीव यत्रेक्षुवणं धुनीते प्रायेण रम्भा चलपत्रदम्भात् ॥ ३५ ॥

अम्भोविहारे यदणूदरीणां हारान्विशीर्णानधिसह्यजातम् ।
स्वयं सुरुङ्गापथतो गृहीत्वा यान्तीक्षवो यन्त्रनिपीडनानि ॥ ३६ ॥

यदन्तरात्युन्नतधान्यकूटमुद्रामषीमुद्रित एव चन्द्रः ।
कलङ्कितां याति न चेत्सुधांशौ न गन्धतोऽप्यङ्ककथाप्रसङ्गः ॥ ३७ ॥

तारापथोल्लङ्घिषु धान्यकूटेष्वगास्तदौन्नत्यमवाप्तुकामाः ।
महत्तपो दैवतमन्दिरेषु प्रासादवेषेण भजन्ति यस्याम् ॥ ३८ ॥

सृजत्यसौ व्योमनि धान्यकूटैर्वर्त्मावलम्बं मम वाहनानाम् ।
इतीव मत्वा स्वत एव भानुर्वृष्टिं यदन्तर्वितती करोति ॥ ३९ ॥

मखाशयैवात्र महेन्द्रपूर्वा देवा वसन्ति त्रिदिवं विहाय ।
तस्मिन्किमस्तीति धरामरेन्द्रा यस्यामकामाः सततं यजन्ते ॥ ४० ॥

अम्भोविहाराद्गलदम्बुधारं वेणीभरं वारिधरं विशङ्क्य ।
यत्रानताङ्गीरनुयान्ति नित्यं सरित्तटादास्सदनं मयूराः ॥ ४१ ॥

पचेलिमस्वादुफलातिहृष्टपान्थस्तवार्तिकं परितोऽवनम्राः ।
मध्येतटं तत्र मरुद्वृधायाः शंसन्ति गोत्रातिशयं कदल्यः ॥ ४२ ॥

कोलाहलैर्निष्कुटकोकिलानां प्रपञ्चिते पञ्चशरप्रभावे ।
अयोगवार्त्तामपि यत्र नैव जानन्ति नित्यं सभया युवानः ॥ ४३ ॥

आत्मीयगानद्रवदालवालमणीतटोद्भ्रान्तमहाम्बुपूरम् ।
आलोक्य यस्यां जलमर्पयन्त्यो मुग्धा वनान्ते हृदि विस्मयन्ते ॥ ४४ ॥

व्यापारभाजो विविधागमेषु विद्वत्प्रवेका इव वावदूकाः ।
दीप्रप्रवालालिदिवाप्रदीपे राजन्ति यस्यां वनराजिकीराः ॥ ४५ ॥

निरीति यां शासति नीतिरीत्या रामावतारे रघुनाथभूपे ।
आरामवाटीमतिवृष्टिरश्चत्यक्षीण्यनावृष्टिरहो प्रजानाम् ॥ ४६ ॥

कह्लारवारं कचगन्धचोरं बद्ध्वा दृढं यत्र पयोरुहाक्ष्यः ।
आशङ्क्य पश्चान्मदनास्त्रजातमनागसं तं शिरसा वहन्ति ॥ ४७ ॥

आसाद्य यत्नेन वनान्तरालं निदाघतापं पथिका निरस्य ।
आलोक्य यत्रान्तिकशालिपालीरनङ्गतापं परमाश्रयन्ते ॥ ४८ ॥

दानाम्बुपूरै रघुनाथनेतुः प्रवर्धिता यत्तरवो भवन्ति ।
न चेद्द्विजेभ्यो नवमेव नित्यं फलानि किं ते प्रतिपादयन्ते ॥ ४९ ॥

आचारतः किं द्रमिडाङ्गनानां वासन्तिकां पुष्पवतीं परीत्य ।
भृङ्गाङ्गनाः शोभनगीतजातं वितृण्वते यद्वनवीथिकासु ॥ ५० ॥

सह्यात्मजायाः सलिलावगाहात्प्रचीयमानैः पुलकप्ररोहैः ।
आलक्ष्यमाणा हरिणेक्षणेव प्रकाशते या कलमप्ररोहैः ॥ ५१ ॥

फलन्ति पादैः पनसा मदीया इति प्रकाश्य स्वयमेव भूयः ।
या पुष्पितक्ष्मारुहरेखयान्यमहीं हसन्तीव विभाति नित्यम् ॥ ५२ ॥

स्वभावशीतेषु जलेषु यस्यां प्रच्छायरम्येष्वपि पादपेषु ।
प्रपां श्रयन्ते पथिकास्तदन्तःकान्तासमालोकनकौतुकेन ॥ ५३ ॥

कवेरकन्यार्पितकङ्कणायाः पदे पदे हंसकनादभाजः ।
यस्याः स्फुरद्दैवतनामकान्ता हारा इवाभान्ति महाग्रहाराः ॥ ५४ ॥

यत्राभिवृद्धान्घनयागधूमैरारुह्य मेघानमराधिनाथः ।
आधातुकामः सततं करोति सौख्येन यातानि गतागतानि ॥ ५५ ॥

समीपसंकेतलतागृहेषु संश्लेषभाजः समवेक्ष्य यूनः ।
गाढोपगूहं क्रमुका यदन्तस्ताम्बूलवल्लयश्च तथा श्रयन्ते ॥ ५६ ॥

सह्यात्मजायाः सलिलप्रभावादाहारतो नित्यमयत्नसिद्धात् ।
वृद्धिं गता यत्र वृषाश्चरन्ति समीपदेवालयचत्वरेषु ॥ ५७ ॥

महोत्सवे दैवतमन्दिरेषु व्यापारितैः संततवाद्यघोषैः ।
अंहोभिधाना हरिणा यदन्तः पलायमाना न पदं लभन्ते ॥ ५८ ॥

यागेषु हूतास्त्रिदशा यदीयैर्मध्येनभः केरफलोदकेन ।
स्वच्छानिलैर्दैवतगोपुराणां पथिश्रमं नैव भजन्ति नित्यम् ॥ ५९ ॥

आवासभाजां विबुधावलीनामभ्यागतानां हविरन्नदानैः ।
या निर्जितस्वर्गतया जयाङ्कान् धत्ते ध्वजान् दैवतमन्दिरेषु ॥ ६० ॥

हवींषि यत्राध्वरकल्पितानि सहस्रनेत्रः समवेक्ष्य हर्षात् ।
आदातुकामः सममाकुलः सन्करान्सदा कामयते सहस्रम् ॥ ६१ ॥

यदीयदेवायतनोत्सवेषु रथोल्लसद्राजतहैमकुम्भैः ।
अप्यावृतं देवगणैः समन्तादनन्तचन्द्रार्कमिवान्तरिक्षम् ॥ ६२ ॥

अम्भोभिरापूर्णनिजालवालाश्चिक्रोडदंष्ट्राशिथिलैः फलाग्रैः ।
केरद्रुमाः स्वादु जलं किरन्तो यस्यां भजन्ते जलयन्त्रभूयम् ॥ ६३ ॥

क्रमेण यद्ग्रामपरम्परायां संशील्य किं स्तम्भनटीविलासान् ।
पयोदमार्गस्पृशि केरपङ्क्त्यां कलापिनो नाट्यकलाः श्रयन्ते ॥ ६४ ॥

फलैः पतद्भिः पवनेन भूयः संघट्य भूमिं सहसोत्पतद्भिः ।
केरावली कन्दुककेलिभाजां धत्ते तुलां यद्भूमिडाङ्गनानाम् ॥ ६५ ॥

फलावली केरपरम्परायाः कोकस्तनीनां कुचकुम्भलीलाम् ।
आहृत्य यस्यां प्रकटापराधा निपीडयते यन्त्रनियन्त्रणेन ॥ ६६ ॥

तारुण्यलावण्यतरङ्गितानां वक्षोरुहेभ्यो वरवर्णिनीनाम् ।
प्राप्तावमानानि फलानि वारि वहन्ति केरद्रुवनस्य यस्याम् ॥ ६७ ॥

तृषाम्बुधिक्षारजलानुषङ्गाच्चिक्रोडदंष्ट्राश्लथितं पयोदाः ।
पिबन्ति यत्केरफलाम्बु नो चेद्वर्षन्ति किं स्वादिमवन्ति वारि ॥ ६८ ॥

नवं नवं श्रीरघुनाथनेतुः प्रपञ्चिते धैर्यकथाप्रसङ्गे ।
महीधरा यत्र पदं विधातुं मन्दाक्षभारादिव न क्षमन्ते ॥ ६९ ॥

प्रतिक्षणं यत्र नितम्बिनीनां प्रचीयमानेषु पयोधरेषु ।
संगोपनं भूमिभृतः श्रयन्ते सहेत कः शात्रवजृम्भणानि ॥ ७० ॥

अतिप्रबन्धाचरिताध्वराणां मनीषिणां मन्त्रविधोपहूतम् ।
वज्राङ्कितं वासवमेक्ष्य भीत्या नगाः स्थितिं नैव भजन्ति यस्याम् ॥ ७१ ॥

यागाय गोत्रद्विषि यां प्रपन्ने विशङ्क्य पक्षव्यपरोपणानि ।
धरातले भूमिधरा वसन्ति वहन्ति भूमीमिति किंवदन्ती ॥ ७२ ॥

यागेषु सांनिध्यजुषो यदन्तर्गोत्राभियातेः कुलिशाद्विभीताः ।
प्रदक्षिणप्रक्रमणानि शंभो रथापदेशाद्रचयन्ति शैलाः ॥ ७३ ॥

प्रबलशिखरमेरुपर्वतौघाननवरतं विबुधेन्द्रहस्तलग्नान् ।
रचयति रघुनाथपार्थिवेन्द्रे न विदधते वसतिं नगा यदन्तः ॥ ७४ ॥

आहूय पल्लवकरैरलिनादपूर्वं धन्याः कवेरतनयातटचूतवाटाः ।
यस्यां गृहस्थनिवहा इव यावदिष्टमानन्दयन्ति पथिकान्फलमर्पयन्तः ॥ ७५ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये प्रथमः सर्गः

---

## द्वितीयः सर्गः

वसतिर्वनजाक्षवल्लभाया वसुधोदञ्चितवैभवप्रपञ्चः।
तरुणीमणिजन्मधाम तञ्जानगरी तत्र गरीयसी समिन्द्धे ॥ १ ॥

निजवैभवनिर्जितामरेन्द्रं रघुनाथं नतरक्षणातिदक्षम्।
शरणं समवाप्य यत्र शैला वरणाकारधरा वसन्ति नित्यम् ॥ २ ॥

अवनीमवदार्य शेषशीर्षाद्रचितो यद्वरणो महार्हरत्नैः।
परधा किमु तत्फणान्तराले प्रभवेद्रत्नपरम्पराप्रसङ्गः ॥ ३ ॥

कुलशैलगजेन्द्रकूर्मकोलाञ्जगतीसंभृतये नियुज्य शेषम्।
वरणच्छलतो दिवोऽवलम्बं कुरुते यत्र कुतूहलेन वेधाः ॥ ४ ॥

घनवप्रतटे गजैश्चरन्तं छुरितं तन्मणिशोभया सुरेभम्।
परिमृग्य यदन्तरा प्ररोद्धुं क्षमते दन्तचतुष्टयेन वज्री ॥ ५ ॥

बहुधा रघुनाथदानतोयैः परिवृद्धिं गमितः पयोनिधिर्याम्।
परिखानिभतः परीत्य नित्यं भजते तद्भुजपालितां कृतज्ञः ॥ ६ ॥

वलयाद्रिवरं विना मदन्तर्वसुधाभृन्निवहा वसन्ति सर्वे।
इति यद्वरणात्मना स्थितं तं परितः खेयनिभात्पयोधिरास्ते ॥ ७ ॥

भजनागतभूमिपाललक्ष्मीवितताः संततविभ्रमाय यस्याम्।
परिखाम्बुनि पङ्कजान्ययत्नानुपकार्यानिवहानुदाहरन्ते ॥ ८ ॥

पठितुं किमभिज्ञपण्डितौघात् सरहस्यं नवमेव शब्दजातम्।
परिखापथतः प्रविश्य यस्यामहिराजो वरणात्मना समिन्द्धे ॥ ९ ॥

परिखासलिलादतिप्रसन्नात्फणिलोकः प्रतिबिम्बतां प्रपन्नः।
वलभौ मणिमन्दिरस्य यस्यां वहते वासवपत्तनस्य साम्यम् ॥ १० ॥

परिखानिभतः पतिं नदीनां निवसन्तं निशि निर्जरस्त्रवन्ती।
शशिकान्तनिबद्धसौधवीथीस्रवदम्भश्छलतः समेति यस्याम् ॥ ११ ॥

मम साम्यजुषो मदावलेन्द्रान्वसुधा गर्भतले वहत्यजस्रम् ।
इति तामिभमण्डली यदीया नितरां दारयते निशातदन्तैः ॥ १२ ॥

करिणो निजगौरवेण यस्यामधरीकृत्य दिगन्तगन्धनागान् ।
अवनौ मदमष्टधा दधानाः प्रकटं तज्जयितां प्रदर्शयन्ते ॥ १३ ॥

कदलीघनकुञ्जदम्भमेघस्फुटशृङ्गारसमन्विता यदीयाः ।
दधते समतां धराधराणां मदनिष्यन्दवहा महागजेन्द्राः ॥ १४ ॥

वसुधावलयं वहन्ति नागाः समवेत्याष्ट सदेति यन्मदेभाः ।
पृथगेव रजःपरम्पराणामपदेशाद्धते तमात्महस्तैः ॥ १५ ॥

करिकुम्भतटे कृताधिवासा कमला यत्र कलानिधिं समेतम् ।
अवलोक्य निशास्वयत्नमाराद्यते सादरभाषणानुमोदम् ॥ १६ ॥

मरुतं समताभृतं ममैतद्ग्रसते भोगिकुलं सदेति यस्याम् ।
वहते प्रमदात्तदेव वल्गाच्छलतः स्कन्धतटीषु सैन्धवालिः ॥ १७ ॥

अहिमांशुरनातपं ममैव प्रतिमानं कुरुते रयप्रकर्षे ।
इति तं पिदधाति किं यदाश्वं जयधाटीजनितैः परागजालैः ॥ १८ ॥

दिवमुत्प्लुतिभिर्भुवं भ्रमीभिः समवेक्ष्यात्मसमं विचेतुकामाः ।
बलिसद्म तुरङ्गमाः प्रवेष्टुं धरणीं यत्र विदारयन्ति पादैः ॥ १९ ॥

घनदानकृतव्ययाम्बुपूरो वनधिर्यद्रघुनाथवासवेन ।
विपणिच्छलतो वितत्य रत्नान्ययते संततवासमा प्रसादात् ॥ २० ॥

अवशिष्टमणिं यदापणाब्धिं कृतवान्मन्दिरदम्भकुम्भजन्मा ।
परधा जलयन्त्रभागधारामुखतो मुञ्चति किं तदम्बु भूयः ॥ २१ ॥

तिमिरानुगुणं धृताङ्गभूषाः कुलटा देहसुगन्धगोपनाय ।
प्रसवापणपद्यया यदन्तश्चतुरं यामवतीषु संचरन्ते ॥ २२ ॥

असितांशुककल्पितावगुण्ठा दरलक्ष्यात्मतनूलताभिरामाः ।
जलदाञ्चलचञ्चलामनीषां जनयन्ते निशि यत्र जारकान्ताः ॥ २३ ॥

प्रसवास्त्रशरा निषङ्गभाजो मणिपेटीनिहिता महार्हभूषाः ।
अभवन्रजनीष्वलक्षिता यत्कुलटा नीलपटावगुण्ठनेन ॥ २४ ॥

घननीलगृहेषु लास्यभाजां चपलानामपि चञ्चलेक्षणानाम् ।
रसिका नवरत्नभूषणौघैरवगच्छन्ति यदन्तरे विभेदम् ॥ २५ ॥

सुरसिन्धुसमेतसूत्रगूढं स्रवदिन्दूपलसौधलक्ष्यमम्भः ।
प्रकटीकुरुते दिवापि यत्र प्रमदावक्त्रसुधाकरप्रभावम् ॥ २६ ॥

सदनेषु समुन्नतेषु नित्यं चरतां यत्र विलासिनां सलीलम् ।
पटवासविधौ प्रसूनरेणुः प्रथते नन्दनपादपावलीनाम् ॥ २७ ॥

प्रतिबिम्बमिषात्प्रविश्य यस्या मणिसौधानि महेन्द्रराजधानी ।
बहुरूपधरेव भाति तेषां परिचर्यापरिशीलनाय नित्यम् ॥ २८ ॥

शिखिलास्यविशेषदर्शनोत्का महिला यद्ध्वजमारुतावधूते ।
जलदे जनयन्ति तं तदात्वे घनवेणीभरकालिमाङ्कुरेण ॥ २९ ॥

जलदार्कशशाङ्कतारकाणां वसतेर्वारिरुहासनो विभागान् ।
हरिनीलशिरोगृहाङ्गणानामपदेशेन यदन्तरे व्यतानीत् ॥ ३० ॥

निगमार्थनिरूपणे प्रगल्भा विबुधा देवगुरुं विजेतुकामाः ।
रचयन्ति ... ... ... ... रन्ति[1] ॥ ३१—४६ ॥

सततं प्रमदावने समन्ताद्विविधान्पुष्पितपादपान्विलोक्य ।
कथयन्ति यदन्तरा वसन्तं रघुनाथं रमणीजना वसन्तम् ॥ ४७ ॥

प्रमदावदनानि पद्मगन्धानहरन्यत्र तदाश्रयास्ततः किम् ।
अवलोकतरङ्गितप्रभाणामपदेशादलयः सदा वलन्ते ॥ ४८ ॥

जनिता मदनैन्द्रजालिकेन प्रमदाश्चित्रलताः परं यदीयाः ।
अधरीकृतपल्लवा यतस्ताः प्रकटं पल्लवपालिका भजन्ते ॥ ४९ ॥

सततं रघुनाथसार्वभौमे प्रथिताचारपरे प्रजा यदीयाः ।
नियमान्न परित्यजन्नि नित्यान्धरणौ भूपतिरेव धर्महेतुः ॥ ५० ॥

मदने मदिरेक्षणाविधेये भ्रमरादीनि बलानि यत्र तासाम् ।
अभजन्रमणीयमङ्गभूयं प्रभुचित्तानुसृतिं भजन्ति सर्वे ॥ ५१ ॥

अबलां हरिरेकिकां निजोरोर्जनयामास पुरेति पद्मजन्मा ।
असुजन्मनसा यदानताङ्गीरतिशेते गुरुमात्मजः सुजन्मा ॥ ५२ ॥

1. The portion relating to vv. 31—46 is missing in the ms,

सुमुखीवदनैः सुधामयूखे परिभूते परिहृत्य तं चकोराः ।
अभजन्त तदक्षितां यदन्तर्बलवन्तं शरणं भजन्ति सर्वे ॥ ५३ ॥

विधुबिम्बमुखीविनीलवेणीघनशृङ्गाररसातिवर्षतः किम् ।
अभवन्नभिकाङ्क्षकानि यस्यामधिकोत्कम्पनरोमहर्षणानि ॥ ५४ ॥

समयोः शशिपद्मयोर्मुखानां प्रमदावक्त्रपदं प्रयाति पूर्वः ।
अपरस्तु तदङ्घ्रितां यदन्तर्बलवत्प्राप्यपदं भजेत्किमन्यः ॥ ५५ ॥

अरविन्दकुलं यदङ्गनानां वदनैरेव निवारितप्रभावम् ।
अधरीकुरुते तदद्य चन्द्रः परिभूतः परिभूयते जगत्याम् ॥ ५६ ॥

क्रयविक्रयतः कृतार्थचर्या मणिजालाङ्कितमन्दिरा यदर्याः ।
प्रहसन्ति महेशपार्श्वलब्धावपि दुर्वर्णगृहाश्रयं कुबेरम् ॥ ५७ ॥

राजन्ति यत्र रघुनाथमहीवलारेः सेवापराः प्रतिदिनं शशिभानुवंश्याः ।
कीर्तिप्रतापनिभतः कुलनायकाभ्यामाराध्यते मुहुरसाविति किं विचार्यं ॥ ५८ ॥

मलयजसमवेतान्मारुतः प्राप्य शैलात्प्रतिकलमबलानां प्रौढवक्षोरुहाद्रीन् ।
परिमलपरिवाहैर्भावितो वाति यस्यां जगति महदवाप्तिर्जायते गौरवाय ॥ ५९ ॥

रत्नानि गर्भरचितानि मया जगत्यां जानाति किं जन इति स्वयमेव तानि ।
विस्तार्य यद्विपणिसीमनि रत्नगर्भा सानन्दमाकलयतीव मनो जनस्य ॥ ६० ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये द्वितीयः सर्गः

# तृतीयः सर्गः

तामावसत्यब्जदलायताक्षीतारुण्यभाग्योदयधन्यजन्मा ।
विश्वत्रयीविश्रुतबाहुधामा रामावतारो रघुनाथभूपः ॥ १ ॥

रत्नाकरान्तःस्थितरत्नसंख्या क्रियेत येनेह कृती स एव ।
अनन्तकल्याणगुणानुपूर्वीं वक्तुं यदीयां विभवेदवन्याम् ॥ २ ॥

कुम्भीन्द्रकुम्भीनसकूर्मगोत्राः कल्पान्तरक्षाकरणानभिज्ञाः ।
वर्ज्या वराहे वसतिर्ममेति यद्बाहुमुर्वी स्थिररम्यमेति ॥ ३ ॥

परीक्ष्य वृत्तं सकलं प्रजानां प्रजा यथा ताः परिपालयन्तम् ।
ज्ञानेन रक्षाकरणेन नित्यं जनाधिपं यं जनकं वदन्ति ॥ ४ ॥

वरं रघूणां गुणवैभवे यं वदन्तु सर्वे रसिका वयं तु ।
सहस्रकान्ताजनसामरस्ये कृष्णावतारं हृदि तर्कयामः ॥ ५ ॥

आलोक्य यद्रूपमतीव लज्जाप्रच्छन्नचारः प्रसवास्त्रवीरः ।
आख्यायते नूनमतत्त्वविद्भिरनङ्ग इत्येष जनैरशेषैः ॥ ६ ॥

विश्राणनाम्बुव्यपदेशसिन्धौ महीपतेर्यस्य मरुन्महीजाः ।
जाता न चेद्भूमिरुहा जगत्यां कथं तु दातृत्वकथां भजेरन् ॥ ७ ॥

दानोदिता यस्य धरावलारेः कीर्त्तिप्ररोहाः किमु कल्पभूजाः ।
भजन्ति लोके परथा महीजा गौरत्वदातृत्वकथां कथं वा ॥ ८ ॥

पद्मा सदा यस्य कटाक्षपद्मे प्राप्ताधिवासा प्रथयत्यभीष्टम् ।
इत्येव मत्वा हृदये कवीन्द्राः पद्मं तदीयं भवनं वदन्ति ॥ ९ ॥

महौजसा येन महीमहेन्द्रकिरीटरत्नेन कृताभिमानाः ।
तुलां भजन्तोऽपि तुलाविहीना भवन्त्यधस्तान्मणयः परार्घ्याः १० ॥

प्रख्यातिभाजामपि पर्वतानां दातुः सदा यस्य धराधरेन्द्राः ।
दुर्गाः परेषामतिदुर्निरीक्षा वशंवदा एव वसन्ति सर्वे ॥ ११ ॥

वक्रालवालेषु विचक्षणानामालक्ष्यमाणाः कविताङ्कुरौघाः ।
यदीयपाण्डित्यरसाभियोगादहन्यहन्यश्नुवतेऽभिवृद्धिम् ॥ १२ ॥

अतत्त्ववित्पूज्यनवारकूटभूषायमाणाः पुरुषा यदीये ।
प्रज्ञाविशेषे निकषे प्रयान्ति विवर्णतां घर्षविधौ स्वकीयाम् ॥ १३ ॥

चातुर्यधुर्यं सरसं मितं च संभाषणं यस्य सभान्तराले ।
विद्यासु विख्यातिभृतो विविच्य तत्तद्गतं धर्ममुदाहरन्ति ॥ १४ ॥

चिन्तासमस्याशतमेकदैव वक्तीति वार्ता न हि वर्णनाय ।
अशेषलोकाशयवृत्तभेदप्रस्तारविद्याप्रथितस्य यस्य ॥ १५ ॥

नीलोत्पलान्येव नितम्बिनीनां नेत्राणि नो चेन्नियतं कथं वा ।
आमोदमन्यादृशमाप्नुवन्ति कलानिधेर्यस्य कलाविलासैः ॥ १६ ॥

प्रज्ञा कृपाणी च परस्परं द्वे धृताभ्यसूये इव यस्य तीक्ष्णे ।
प्रस्तूयमाने समितौ परेषां प्रकल्पयेते हृदयप्रभेदम् ॥ १७ ॥

मनोहरा मानवतीश्च विद्या विधातुरम्भोजभुवो विधानम् ।
सौन्दर्यमेधातिशयेन यस्य साफल्यमभ्येति सदा जगत्याम् ॥ १८ ॥

बोधाम्बुधौ यस्य बुधावलीनां प्रज्ञाविशेषास्तटिनीप्रवाहाः ।
प्रख्यातिमन्तोऽपि परं विलीना भजन्ति निर्धार्यं पदं न किंचित् ॥ १९ ॥

अन्तःपुरान्तर्हरिणेक्षणासु त्रिहायणीनामपि दीव्यमानान् ।
विलोक्य विद्याविभवानजस्रं वशंवदां यस्य वदन्ति वाणीम् ॥ २० ॥

कटाक्षसंज्ञाकलनेन यस्य पयोधिकन्या नटति प्रगल्भम् ।
तदैव तादृग्विभवाभिरामा नटन्ति शुद्धान्तनटीमतल्लयः ॥ २१ ॥

वेत्रप्रहारैर्विगलत्किरीटप्रत्युप्तमुक्ताफलपद्मरागाः ।
भूमीपरिण्यो दधते पुनस्तान्नवं नवं यन्नखपादभासा ॥ २२ ॥

पादाङ्गदे यस्य विभोः प्रतीपजनाधिपाः स्वं प्रतिबिम्बमेक्ष्य ।
अनर्घरत्नावसथेषु वासं चिरोज्झितं चेतसि चिन्तयन्ते ॥ २३ ॥

आराधने यस्य गृहाङ्गणेषु संमर्दभाजां जगतीपतीनाम् ।
श्रमं हरन्ते सततं मदेभाः कर्णोच्चलच्चामरगन्धवाहैः ॥ २४ ॥

प्रणामभाजां नरपालकानां मणीकिरीटद्युतिमञ्जरीभिः ।
विभाति सेवाविभवेषु यस्य पादाङ्गदं पल्लवितं सदैव ॥ २५ ॥

अमुष्य गाम्भीर्यमपां निधानमपाकरोतीति तदन्तरस्थाः ।
नेपालभूपादिनृपाः शरण्यं भयाकुला यं शरणं भजन्ते ॥ २६ ॥

नमस्यतां फालतले नृपाणां लिपिं विधात्रा लिखितामयुक्तम् ।
प्रमार्ष्टि यत्पादपयोजभूषावलारिनीलद्युतिवर्णरेखा ॥ २७ ॥

पर्जन्यवद्येन कृतप्रचारे घनाघनानां निचयेन गर्जे ।
परःसहस्राः परराजहंसाः पद्माकरं सद्म भयात्त्यजन्ति ॥ २८ ॥

पूष्णीव पूर्वाचलशृङ्गभागमारुह्य दन्तावलमध्यनीकम् ।
वहत्यभेद्यं मणिवर्म यस्मिन्मन्देहतां यान्ति महीमहेन्द्राः ॥ २९ ॥

प्राणावनख्यातिजुषः परेषां यात्रासु भेरीनिनदोऽपि यस्य ।
पलायितानेव परान्विधाय प्राणावनख्यातिपरः समिन्द्धे ॥ ३० ॥

यात्रासु यद्वारणलक्ष्यमाणहैमध्वजालीचपलातिभासा ।
संकोच्य भोगान्सहसारिनागा अनीकसीमासु वसन्ति भीताः ॥ ३१ ॥

तिग्मांशुबिम्बादपि तीक्ष्णमेव प्रचक्षते यस्य भुजप्रतापम् ।
अवाप्तभङ्गैरपि वैरिभिस्तद्विभिद्यते येन विमुक्तशङ्कम् ॥ ३२ ॥

प्राणानिले विद्विषतां प्रशान्ते कीलालवर्षे यदि सम्प्रकर्षे ।
प्रतिक्षणं यस्य भुजप्रतापवैश्वानरो वृद्धिमुपैति चित्रम् ॥ ३३ ॥

भूमीभृतो यस्य भुजाग्रशृङ्गात्प्रतापभानावुदयं प्रपन्ने ।
अहो गरीयानयशोऽन्धकारो विजृम्भते विद्विषतामवन्याम् ॥ ३४ ॥

भुजे यदीये मणिभूषणानां प्रभा समन्तात्परिलक्ष्यमाणा ।
उदेष्यतो नित्यमुदग्रशक्तेः प्रतापभानोरिव भाति संध्या ॥ ३५ ॥

चमूचरैर्यस्य भटैः समीके निपातिते वैरिनृपालवर्गे ।
अनाश्रयत्वादभिलक्ष्यमाणा रजोगुणा एव न किं रजांसि ॥ ३६ ॥

चमूरजो यस्य समीपवर्तिधारालदन्तावलदानतोयैः ।
आचान्तमाशान्तविसृत्वरं तु शान्तं रिपुस्त्रीजनबाष्पसेकैः ॥ ३७ ॥

भटैर्यदीयैः प्रधनेऽरिभूपाः पतेयुरित्येव परिष्कृताङ्गयः।
दिव्याङ्गनास्तेषु पलायितेषु निरूढलज्जा हृदि निःश्वसन्ति ॥ ३८ ॥

प्रख्याय नः प्राणसमाः सदैव प्राणानिहास्मद्वहुमन्यमानाः।
धावन्ति नाथा इति दीनदीनं भटेषु यस्य ब्रुवतेऽरिकान्ताः ॥ ३९ ॥

महीभृदग्रे बहुमान्यसत्त्वः कण्ठीरवो यः परगन्धनागैः।
अत्याहितादक्षिपथेऽतिदीनैरहो तृणान्यादयते दयालुः ॥ ४० ॥

यज्जैत्रयात्रास्वरिभूपतीनामास्येषु संदष्टतृणाङ्कुरेषु।
तृणानि गृह्णन्ति तथा तदीयमणिकिरीटानि महीगतानि ॥ ४१ ॥

भेरीरवं यस्य निशम्य भीत्या पलायमानेष्वरिपार्थिवेषु।
प्रतापलेशा इव भान्ति तेषां भूषाविशेषा भुवि विप्रकीर्णाः ॥ ४२ ॥

समागमे यस्य जयेन्दिरायाः प्रमोदवत्याः पुलकप्ररोहैः।
भजन्ति साम्यं प्रधने भटानां कुन्ताः समन्तात्तपनीयकृप्ताः ॥ ४३ ॥

यात्रासु यस्यारिभिरुज्झितानि श्रीमन्ति विश्वक्शिबिराणि भान्ति।
स्वप्राणगुप्तैश्चतुरं प्रकृप्ता नवोपकार्या इव नर्महेतोः ॥ ४४ ॥

पर्याप्तनानाप्रभुयोग्यचिह्नान्पलायितानां परपार्थिवानाम्।
सेनानिवेशान्समुपेत्य सद्यो भटा यदीयाः प्रभवो भवन्ति ॥ ४५ ॥

विज्ञास्तृणान्येव विशिष्य युद्धे प्रचक्षते यस्य परक्षितीशान्।
येन प्रधावन्ति रयेण दन्तिपताकिकानां पवनप्रचारात् ॥ ४६ ॥

भुजाद्रिणा यत्पुरुषोत्तमस्य प्रमथ्यमानः परसैन्यसिन्धुः।
प्रकाममाविष्कुरुते प्रमोदं श्रियं वितीर्याखिलसेवनीयाम् ॥ ४७ ॥

भयातिरेकेण पलायमानाः प्रगल्भशौर्येण रणे पतन्तः।
प्रत्यर्थिभूमीपतयो यतस्ते स्वाराज्यलब्ध्यै विचरन्ति चित्रम् ॥ ४८ ॥

धाटीषु यत्सैन्यतुरङ्गमाणां धारोत्थितान्येक्ष्य धरारजांसि।
अकीर्त्तिभारानपि धारयन्तो धावन्त्यहो वैरिधराधिनाथाः ॥ ४९ ॥

कान्ता भूधरकन्दरान्कुचभरश्रान्ता भवत्यः कथं
यास्यन्तीत्यभिधायिषु प्रियतमेष्वात्मीयवेश्मान्तरे।

नाथा यास्यथ साधु यूयमयशोभारं वहन्तो यथे-
स्यालापाः प्रभवन्ति वैरिसुदृशां यज्ञैत्रयात्राश्रुतौ ॥ ५० ॥

क्षितिसमुचितयोगक्षेमकृत्याय तस्मि-
न्प्रभवति रघुनाथक्षोणिपालावतंसे ।
कृतयुग इव नित्यं केवलं सर्वभोगा-
ननुभवति जनौघः संततानन्दधन्यः ॥ ५१ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये तृतीयः सर्गः

# चतुर्थः सर्गः

अथ शास्त्रचोदितमहर्मुखोचितं विरचय्य शोभनविधिं विशां पतिः ।
सकलप्रदां सदनमध्यवासिनीमवनन्तुमैहत रमां समाहितः ॥ १ ॥

विभुचित्तवृत्तिविभवानुसारिणीष्वबलासु काचन समागता शनैः ।
महिला व्यजिज्ञपत मज्जनोचितं समयं सुधारससगन्धया गिरा ॥ २ ॥

तदनन्तरं तरललोचनामणेरवलम्ब्य पाणिमवनीश्वराग्रणीः ।
उदतिष्ठदुज्ज्वलमणीमयासनाद्वलमानहेमवसनाञ्चलाञ्चितः ॥ ३ ॥

जयजीववादिनि सतारनिस्वनं मणिवेत्रधारिणि मनस्विनीजने ।
पदक्लृप्तरत्नमयपादुकः शनैरभिषेकमन्दिरमगाज्जनाधिपः ॥ ४ ॥

अधिरुह्य तत्र कनकासनं शनैरपनीय रत्नमयभूषणावलिम् ।
अबलाकरोपहृतहैमभाजने विनिवेशयत्यथ विशामधीश्वरे ॥ ५ ॥

समुपेत्य काचन चकोरलोचना परिक्लृप्तरङ्कुमदभावितं विभोः ।
अपसार्य माल्यमकरोन्नखाञ्चलैः सरलानरालचिकुरान्सविभ्रमम् ॥ ६ ॥

अपरा कलक्कणनहस्तकङ्कणं वलमानहारवलयातिमोहनम् ।
श्रमवारिकर्दमितफालचित्रकं चलवेणि सामिगलितोरुगर्भकम् ॥ ७ ॥

श्लथसंधिकञ्चुकचलाचलस्तनं श्वसितानिलोच्चलितसौरभोर्मिलम् ।
विवलन्मणीरचितकर्णवेष्टनं विनतांसबाहुविनिवेशपेशलम् ॥ ८ ॥

कनकप्रसूनकलिताधिवासया तरुणी सुगन्धिततरतैलधारया ।
समभावयज्जनपतेः शिरोरुहान्करक्लृप्ततालकलनादमेदुरम् ॥ ९ ॥

इतरावकीर्य हिमवारिशीकरान्परिक्लृप्तचन्दनरसेन पाणिना ।
परिमृज्य कैशिकमतैलपङ्किलं नृपतेरकल्पयत नीरजेक्षणा ॥ १० ॥

घनसारमेलनसुगन्धिभिर्मणीकमनीयकाञ्चनकटाहवारिभिः ।
करशातकुम्भकलशापवर्जितैर्नृपमभ्यषिञ्चत नितम्बिनीजनः ॥ ११ ॥

परिवेष्टय मूर्धनि पटीं मनोहरामपनुद्य वारि तनुलग्नमंशुकैः ।
परिधानधारिणि धरापतौ शनैरपराकरोद्गुरुधूपमग्रतः ॥ १२ ॥

नतमध्यमा नखमुखैः शिरोरुहान्विततान्विधाय वसुधासुधानिधेः ।
परिकल्प्य कुङ्कुमदपङ्कभाविताङ्शनकैरनह्यत सलीलमेकिका ॥ १३ ॥

वदनाब्जसौरभवलन्मधुव्रतव्यतिषङ्गचञ्चलविलोचनाञ्चला ।
इतराकरोच्चिकुरबन्धमीशितुः प्रमदा तदा-प्रसवदामबन्धुरम् ॥ १४ ॥

तरुणार्कमण्डलतरङ्गितप्रभापरिभाविरोचिरवभासुरं विभुः ।
कमलेक्षणाकरसरोरुहार्पितं कनकाम्बरं नवमधत्त कौतुकात् ॥ १५ ॥

मणिदर्पणं मदिरलोचनामणिः प्रतिबिम्बरम्यमवहत्प्रभोः पुरः ।
भवतस्तुला भुवि भवानिति स्वयं गदितुं समुद्यमवतीव काचन ॥ १६ ॥

अभिवीक्ष्य दर्पणमथावनीपतिर्जयकारणं जपमनुस्मरन्द्रुदा ।
अभिवाद्य सादरमशंसदात्मवानवलोकयन्सुचिरमंशुमालिनम् ॥ १७ ॥

भवदीयपादभजनेन मे यतः प्रकटीकरोषि ननु पाद्मवैभवम् ।
अत एव कारणममूग्पदस्तव प्रवदन्ति पद्महित पाद्मवैभवे ॥ १८ ॥

तपनोऽसि भास्कर तथापि देहिनां भवदीयपादभजनानुषङ्गिणाम् ।
हरसे महान्तमभितापमान्तरं तव वेत्ति को जगति तत्त्वगौरवम् ॥ १९ ॥

प्रवदन्ति संप्रति भवन्तमीक्षणं जगतामहस्कर जगत्प्रभोरसि ।
नलिनेक्षणस्य नगकन्यकापतेरयसे कथं नयनतां तदद्भुतम् ॥ २० ॥

सतताऽतिदुर्लभसमस्तदेवताभजनेन किं वद पयोजबान्धव ।
अखिलानि वाञ्छितफलान्ययत्नतः प्रददासि यद्भुवि सकृत्प्रणामतः ॥ २१ ॥

प्रभवन्तु दैवतगणाः परःशता भजनीय एव हि भवान्दिवाकर ।
भवमाधवाम्बुरुहसंभवा यतो भवदीयरूपभजनं वितन्वते ॥ २२ ॥

अनिशत्वदीयभजनानुमोदिनां वसुधातले वसु ददासि यत्ततः ।
समुपैति वृद्धिमतुलां सहस्रधा वसुसंततिर्ननु विभावसौ तव ॥ २३ ॥

सलिलं हरन्ति सहसैव तत्पुनः प्रदिशन्ति ते तपन भानवो यतः ।
तत एव किं नु धरणीतलेऽधुना प्रथिताजनिष्ट ननु चित्रभानुता ॥ २४ ॥

तिलकं शचीरमणदिग्वधूमणेः प्रवदन्तु केचन परं धरातले ।
निगदाम्यहं निखिलदेवताततेस्तिलकं भवन्तमधुना दिवाकर ॥ २५ ॥

उदयं निरन्तरमुपासनाजुषः प्रतिपादये सपदि भक्तसंततेः ।
इति किं विचार्य हृदये समश्नुषे दिननायक त्वमुदयं दिने दिने ॥ २६ ॥

जलजातबान्धव समस्तयोगिहृज्जलजान्तरेषु चिरवाससौहृदात् ।
जगतीतले जलजसंततिं भवान्नयति प्रमोदमधुना नवं नवम् ॥ २७ ॥

अनिशं प्रबोधमपि वार्त्तमप्यदोजगतो यतो जनयसि त्विषां पते ।
तत एव देवनिकरे महत्तरे प्रथिता तवैव ननु लोकबन्धुता ॥ २८ ॥

प्रथितं मदीयकुलपावनं रघुप्रवरं सदा मनसि भावयत्यसौ ।
इति वासरेश हृदये विचार्य किं तनुषेऽन्वहं जगति धन्यमेव माम् ॥ २९ ॥

इति वाक्प्रसूनविसरैरिलाधिभूरभिपूज्य भास्करमवाप्तवाञ्छितः ।
कपिलां निषेव्य कमलाविलास इत्यभिधां दधानमगमन्मणीगृहम् ॥ ३० ॥

अधिवेदि तत्र मणिपीठिकान्तरे हरिनीलजालरुचिहारिरोचिषम् ।
कनकाम्बरद्युतिकनत्कटीतटं करुणारसोर्मिलकटाक्षवीक्षणम् ॥ ३१ ॥

मधुराधराञ्चितमृदुस्मिताङ्कुरं मृगनाभिचित्रकमनोहराननम् ।
महनीयरत्नमकुटप्रभोज्ज्वलं मणिकुण्डलाङ्कितकपोलमण्डलम् ॥ ३२ ॥

शरचापलक्षितशयाम्बुजद्वयं शरदिन्दुमण्डलसहोदराननम् ।
अवनीसुतानुजसमेतमानमद्रघुनायकं स रघुनाथनायकः ॥ ३३ ॥

तदनूपविश्य धरणीश्वराग्रणीरधिभद्रपीठमतिपावनाकृतिः ।
अकरोदनेकनियमक्रमाङ्कितं हरिनामतीर्थविधिमादरान्वितः ॥ ३४ ॥

हरिसंनिधौ विधिवदर्चितैः शुभैः कनकाङ्कशङ्खसलिलैः करोक्षितैः ।
अतिपावनान्यकलयन्निजाङ्गकान्यनुवेलमाकलितनामकीर्तनः ॥ ३५ ॥

पुरतः पुरोहितकरोपकल्पिते मणिभाजने धवलमृत्स्नया ततम् ।
अधिमध्यमाहितनिशारजोङ्कनं तनुते स्म पुण्ड्रमुचितं धराधिपः ॥ ३६ ॥

हृदयाम्बुजे जनकजाहृदीश्वरं विविधोपचारसहितं विभावयन् ।
करभासिमौक्तिककृताक्षमालिको जपमातनिष्ट जगतीपुरंदरः ॥ ३७ ॥

अवनीसुधांशुरथ जानकीधवं रमणीयरत्नखचितैर्हिरण्मयैः ।
प्रसवैरपि प्रथितवासनाभरैः समपूजयद्बहु सहस्रनामभिः ॥ ३८ ॥

प्रसवाञ्जलिं रघुपतेः प्रकल्प्य तत्पदतीर्थमन्त्ररुपयुज्य पावनम् ।
अधिकर्णभासितुलसीदलाङ्कनो जनकादिमानजयदेष चर्यया ॥ ३९ ॥

अभिजातभागवतहस्तधारितं महिजासखार्चनविशेषमानितम् ।
अधिमूर्ध्नमावहत माल्यमादरादभिकॢप्तदूर्वमवनीसुधाकरः ॥ ४० ॥

अरविन्दबान्धवतनूभवादिमप्रथितात्मभक्तपरिपालनक्षमम् ।
क्षितिजापतेरभयहस्तमानमत्क्षितिजानिरात्मशिरसा वहन्मुदा ॥ ४१ ॥

बहुनित्यदानकलनात्परःशतानवनीसुरानधिगतार्थवाञ्छितान् ।
परिकल्प्य रामचरितं प्रजाधिभूरवतंसमातनितुमैहत श्रुतेः ॥ ४२ ॥

अथ रामवृत्तमखिलं यथाक्रमं कलुषापहं सकलकाङ्क्षितप्रदम् ।
निखिलागमार्थनिधिरग्रतः सुधीर्हितमुज्ज्वलार्थयुतमित्यवीवचत् ॥ ४३ ॥

वनजासनार्पितवरप्रसादतो भुवि वामलूरुतनयेन पूरिताम् ।
धरणीसुताधवकथां तदग्रतः कुशलौ स्फुटं कुशलवावगायताम् ॥ ४४ ॥

सरयूनदीसविधसीम्नि कोसलेष्वमरावतीरुचिरतातिशायिनीम् ।
नगरीं ररक्ष नगवैरिविक्रमः सुरसाह्यकृद्दशरथः कुलागताम् ॥ ४५ ॥

तनुजातजन्म हृदि तत्र भूपतावनुचिन्तयत्यथ दशाननार्दितैः ।
अनुनाथितः कमलसंभवादिमैस्तनुजन्मतामधित तस्य माधवः ॥ ४६ ॥

अथ राम इत्यभिहितः पुरातनः पुरुषः प्रजानयनपूर्णचन्द्रमाः ।
भरतादिभिस्त्रिभिरतीव पावनैरनुजैः समं पितुरधत्त कौतुकम् ॥ ४७ ॥

गुरुवाक्यतः सपदि कौशिकानुगो धरणौ निपात्य विशिखैः स ताडकाम् ।
दलयन्सुबाहुमपि ताडकासुतं मुनियागरक्षणपरोऽभवन्मुदा ॥ ४८ ॥

पदपङ्कजातरजसः प्रभावतो विरचय्य वर्त्मनि शिलां विलासिनीम् ।
धनुरीक्षितुं सपदि मेरुधन्वनो मिहिरान्वयः स मिथिलां समासदत् ॥ ४९ ॥

विदलय्य शंभुविशिखासनं करे जनकात्मजां समवलम्ब्य पाणिना ।
परिभूय भार्गवभुजाबलं रघुप्रवरो जगाम निशि पत्तनं मुदा ॥ ५० ॥

अभिकल्प्यमानविबुधाभिषेचनो रघुनन्दनः सकललोकरञ्जनः ।
हितमन्थराभिहितकेकयात्मजावरसंयतेन गुरुणा विवासितः ॥ ५१ ॥

अथ लक्ष्मणावनिसुतासमन्वितो गुहपूजितो रघुकुलाग्रणीर्नदीम् ।
स विलङ्घ्य संयमिवतंसशासनादधिचित्रकूटमवसन्मनोहरे ॥ ५२ ॥

भरताय तत्र मणिपादुकायुगं प्रतिपाद्य राज्यपरिपालनक्षमम् ।
अथ दण्डकावनमवाप्य राघवो विशशास वर्त्मनि विराधमाशुगैः ॥ ५३ ॥

शरभङ्गमेक्ष्य स विनम्य कुम्भजं शराधिं शरासनमसिं च तद्गिरा ।
परिगृह्य पञ्चवटिकामुपेयिवान्व्यतनिष्ट शूर्पणखिकां विरूपिणीम् ॥ ५४ ॥

खरदूषणत्रिशिरसां च खण्डनं परिकल्प्य तद्बलचयस्य चाहवे ।
हरिणाकृतिं दधतमाशरं शरैरवपात्य तूर्णमगमज्जटायुषम् ॥ ५५ ॥

वचनेन तस्य वसुधासुतामणेरवकर्ण्य वृत्तमखिलं स राघवः ।
प्रतिपाद्य तस्य मखमुत्तमं तदा धरणीसुतामृगणतत्परोऽभवत् ॥ ५६ ॥

विचरन्वने जनकजावियोगतो न्यवधीत्कबन्धमतिघोरविग्रहम् ।
अभिजग्मुषीं सकलुषामयोमुखीं विदधे स वर्त्मनि विरूपिणीं तदा ॥ ५७ ॥

शबरीप्रकल्पितसमर्चनाविधिः पवमानसूनुवचनेन भानुजम् ।
परिगृह्य सालपरिभेदनादिमं विरचय्य वालिनमपातयद्विभुः ॥ ५८ ॥

अथ भानुसूनुमभिषिच्य तत्पदे व्यपनीय वारिधरवासरांस्तदा ।
अवनीसुतां भुवि विचेतुमञ्जनातनयादिमान्स विससर्ज तद्भटान् ॥ ५९ ॥

अथ तेषु सागरमतीत्य पावनिर्दशकण्ठपत्तनवने धराभुवे ।
प्रतिपादयन्रघुपतेः करोर्मिकामदसीयमौलिमणिमाददे ततः ॥ ६० ॥

अवभज्य केलिवनमक्षराक्षसप्रवरैः सहैव पवमाननन्दनः ।
अनलाहुतं नगरमारचय्य तत्पुनराजगाम रघुपुंगवान्तिकम् ॥ ६१ ॥

अधिगम्य मौलिमणिमञ्जनामणेरनुगृह्य पङ्क्तिवदनानुजं विभुः ।
अभिक्लृप्तसेतुमतिलङ्घ्य सागरं नगरं रुरोध नगवैरिवैरिणः ॥ ६२ ॥

युधि लक्ष्मणेन रजनीचरोत्करे सबलं हते सपदि शक्रजिन्मुखे ।
अथ कुम्भकर्णमपि रावणं शरैरवधीत्सबन्धुमहिमांशुवंशजः ॥ ६३ ॥

अतिपावनीमवनिजामुपेयिवानमरैः स्तुतः स दशकंधरास्पदे ।
अभिषिच्य तत्सहजमात्तयूथपैराधिरुह्य पुष्पकमगान्निजां पुरीम् ॥ ६४ ॥

भरतादिभिरवनतः प्रसूजनानवलस्य बन्धुभिरतीव मानितः ।
व्यपनीय वल्कवसनं जटाश्च्छदा मणिभूषणानि महिजाधवोऽवहत् ॥ ६५ ॥

अथ तस्य शासनमरुन्धतीपतेरवतंसयन्नवनिजामनोहरः ।
भरतादिसोदरजनेन पार्श्वयोरभिकॢप्तराजविभवातिशोभितः ॥ ६६ ॥

परितःप्रसारिसुमवर्षभासुरं श्रुतिसौख्यदायिसुरदुन्दुभिस्वनम् ।
अतिशोभमानमभितोऽवनीश्वरैरभिषेकमङ्गलमवाप शाश्वतम् ॥ ६७ ॥

धरणीं प्रशासति धरासुतापतौ धनधान्यगोधनयुताः शुभान्विताः ।
नियतस्वकर्मनिरताश्चिरायुषो भयदैन्यलेशरहिताः प्रजा बभुः ॥ ६८ ॥

इति वाचयत्यतिहितं सुधीजने महिकन्यकाधवकथां महीधवः ।
अवनम्य देवमथ तं पुरः स्थितं बहुधाशिषा बहुमतोऽभवद्बुधैः ॥ ६९ ॥

मन्त्राक्षतान्महिसुपर्वकरोपनीतानादाय भूमिपतिरञ्जलिसंपुटेन ।
मूर्ध्ना वहन्मुदमवाप्य यथार्हमेव प्रास्थापयन्निजगृहान्प्रति तान्प्रणम्य ॥ ७० ॥

भूयो भक्त्या भूमिकन्योपयन्तुः पादाम्भोजे भाग्यहेतू प्रणम्य ।
आसाद्यान्तः सान्द्रमानन्दमैच्छच्छ्रूषाभिः स्वंभूषितुं भूमहेन्द्रः ॥ ७१ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये चतुर्थः सर्गः

---

# पञ्चमः सर्गः

तत्र वीक्ष्य समयं धराभुजः सौविदल्लनिवहः ससंभ्रमम् ।
आनयत्सविभ्रमब्जलोचना भूषणप्रकरपूर्णभाजनाः ॥ १ ॥

काचिदत्र परिचारिकाजने दर्पणं धरणिपाकशासितुः ।
संमुखे मणिमयं सविभ्रमा नीरजातनयना न्यवीविशत् ॥ २ ॥

वक्त्रमेतदभिवर्णयन्ति मे पूर्णचन्द्रमिति किं स भूपतिः ।
अङ्कनं नखमुखैरकल्पयन्मार्गनाभतिलकं मनोहरम् ॥ ३ ॥

आननादिमरसाङ्कुरो यथा तत्पयोजयुतषट्पदो यथा ।
मान्मथोत्पलमयाशुगो यथा मार्गनाभतिलकं विभोरभात् ॥ ४ ॥

अङ्गकेष्वमितसौरभावृतेष्वङ्गरागमदधादथैष यत् ।
तत्र हेतुरवनीधवाग्रणीधार्यता न हि तदीयसौरभम् ॥ ५ ॥

मानितं स मकुटं मणीमयं मौलिसीम्नि नृपमन्मथोऽवहत् ।
भावनातिशयवश्यभावतः प्राप्तवन्तमिव भानुमालिनम् ॥ ६ ॥

पद्मरागमकुटेन भास्वता भास्वता तुलितभानुषा व्यभात् ।
रत्नकूटरमणीयविग्रहो रत्नसानुरिव राजशेखरः ॥ ७ ॥

कर्णपूर्णनिमिराजकन्यकाकान्तविश्रुतकथासुधाम्बुधेः ।
स्रस्तलग्नपृथुबिन्दवो विभोः कर्णिकाकलितमौक्तिकव्रजः ॥ ८ ॥

मौक्तिकाङ्कमवहन्मनोहरं कञ्चुकं विरलकौमुदीसखम् ।
किंकरत्सकलतारकाश्रितां कीर्त्तिसंततिमिवावनीधवः ॥ ९ ॥

नेत्रपर्वतपनीयनेत्रभाभासुरो धरणिपाकशासनः ।
हैमचेलधरमब्जमन्दिराप्राणनायकमसस्मरत्प्रभुम् ॥ १० ॥

हीरकॢप्तपदकेन्दुसेवनप्राप्ततारकपरम्परायिता ।
कण्ठकम्बुमभितः कृतासिका हारपङ्क्तिरवनीपतेरभात् ॥ ११ ॥

अस्यगाधहृदयान्तरोल्लसद्गाढनिश्चलगभीरतां बुधः ।
भासुरामिव सदा प्रसादतो मौक्तिकालिमवहन्महीपतिः ॥ १२ ॥

तारकारुचिरतामुपेयुषा तारमौक्तिकवितानरोचिषा ।
भूषणेषु भुजकीर्त्तिरेव सा भूभुजोऽस्य भुजकीर्त्तितामगात् ॥ १३ ॥

पद्मरागखचितं प्रभोरभादङ्गदं रुचिरतास्पदं भुजे ।
आहृतैः समिति तैजसाङ्कुरैराहिताश्रयमिवारिभूभुजाम् ॥ १४ ॥

अब्जरागमणिमौक्तिकाङ्कितं कङ्कणं दधदिलावलद्विषः ।
कल्पपादप इवालसत्करः पल्लवालिसुमकोशभासुरः ॥ १५ ॥

ईप्सितानुगुणमेव संततं दातुरस्य धरणीसुधानिधेः ।
हस्तदानजलकैतवाम्बुधेरूर्मिका मणियुताः किमूर्मिकाः ॥ १६ ॥

अङ्गदं मणिमयं पदास्पदं मण्डलेशमणिमौलिमण्डलम् ।
आनतं हसति नित्यमात्मनो हीरदीधितिनिभादिलाविभोः ॥ १७ ॥

लक्ष्यते स्म शुभलक्षणाकृतिः पारिजात इव पार्थिवाग्रणीः ।
अर्थिवाञ्छितसमर्थनात्परं नैव नैकविधभूषणैरपि ॥ १८ ॥

धैर्यतो न हि परं धरातले पादरत्नकटकेन च प्रभुः ।
राजते स्म रमणीयविग्रहो मेरुशैल इव मेदिनीधवः ॥ १९ ॥

इत्यलंकृतिमुपेत्य मञ्जुलां वृत्रशासनसमानवैभवः ।
आसदन्मणिसभान्तरं विभुः सिंहशाव इव शैलगह्वरम् ॥ २० ॥

यत्र शिल्पिवरयत्नकल्पिते भासुराण्यगरुधूपभक्तिभिः ।
पद्मरागमणिपद्मतोरणान्यावृतान्यलिगणैरिवालसन् ॥ २१ ॥

यत्र हेमकदलीषु यत्नतः पञ्चवर्णमणिकीरपालिकाम् ।
जानते मधुरया जना गिरा पञ्चवर्णशुकपालिकामपि ॥ २२ ॥

पार्श्वभागमणिसालभञ्जिकावक्त्रचन्द्ररुचिवैभवादिना ।
भाति यत्र वलभिन्मणीमयी तोरणासिनसरोजधोरणी ॥ २३ ॥

यत्र भूरमणतैजसप्रभां यातुमेव हृदि यत्नपूर्वकम् ।
आगतेव तरुणार्कमण्डली रत्नदर्पणततिर्विराजते ॥ २४ ॥

पार्श्वरत्नफलकेषु भूभुजो भासुरान्प्रतिकृतिव्रजान्मुहुः ।
यत्र चित्ररचनाश्च यत्नतो वीक्ष्य चापि न विवेक्तुमीशते ॥ २५ ॥

गन्धसिन्धुरघटाकटोच्चलन्मत्तषट्पदपयोदमालिकाः ।
वीक्ष्य यत्परिसरे वितन्वते ताण्डवानि तरुणाः शिखण्डिनः ॥ २६ ॥

भद्रपीठवसतेश्च पार्श्वयोश्चामरैश्च शरदिन्दुसोदरैः ।
यत्प्रगल्भतरशोभया सभा राजवज्जगति शोभतेतराम् ॥ २७ ॥

यत्नलभ्यमवनीशसेवनं यत्र वीक्ष्य लिखितं स्वकर्तृकम् ।
आत्मजन्म सफलं हृदन्तरे मन्वते स्म महिपालशेखराः ॥ २८ ॥

यत्र भूरमणसेवया बभुर्गौरवाज्जलधिकन्यकामणेः ।
वीक्षणाङ्कुरविभाविजृम्भिता मौक्तिकाङ्कितवितानमालिकाः ॥ २९ ॥

पार्श्वरत्नपरिकल्पनोल्लसत्कल्पभूमिरुहकल्पनं हृदा ।
भावयन्ति भजनागता जना वीक्ष्य वस्तु विविधं यदन्तरे ॥ ३० ॥

पार्थिवस्य भजनात्प्रसेदुषो यत्र भूमितनयाहृदीशितुः ।
दीपिकानिकरमन्तिके दिवा दीपयन्ति मणयः स्वदीप्तिभिः ॥ ३१ ॥

आत्ममौलिमणिमण्डलाङ्कितं पादपीठमवलोक्य यत्प्रभोः ।
चिन्तया परिवृताः क्षितीश्वरा भावयन्ति वदने प्रसन्नताम् ॥ ३२ ॥

तत्र हेममयवेत्रधारिभिर्वार्यमाणवसुधेशमण्डलम् ।
पूर्णकुम्भसहितैः पुरोहितैः पूर्यमाणशुभवादपूर्वकम् ॥ ३३ ॥

पाण्ड्यमण्डलनृपालकाग्रणीहस्तसत्वरकृतावलम्बनम् ।
सिंहलक्षितिपसिंहसंभृतापादलम्बितचलत्पटाञ्चलम् ॥ ३४ ॥

पार्श्ववर्तिकरहाटपार्थिवप्राग्र्यसूचितपदावधानकम् ।
शौरसेनकरसारसोल्लसच्चामरोदितसमीरसौरभम् ॥ ३५ ॥

गायनाकलितगानमाधुरीकल्पितश्रवणकौतुकोदयम् ।
अध्यरुक्षदवनस्य राघवं सिंहपीठमवनीशशेखरः ॥ ३६ ॥

रत्नपीठपरिलक्षितो मणीभूषणैररुचदेष भूपतिः ।
रत्नसानुघनसानुलक्षितः पद्मिनीपतिरिव प्रभाभरैः ॥ ३७ ॥

पार्श्वसीम्नि नृपपाकशासितुः पाणिपद्मसमयानुपालनम् ।
भावयन्धृतकरङ्कभाजनः केरलाधिपतिरास्त केवलम् ॥ ३८ ॥

दत्तदृष्टिरवनीधवानने स्तम्भपार्श्वदरदृश्यविग्रहः ।
कौतुकान्मणिकलाचिकां वहन्वङ्गभूमिपुरसुं न्यषेवत ॥ ३९ ॥

पार्श्वयोर्मगधमालवेश्वरौ बाहुधाम नृपपाकशासितुः ।
हाटकाङ्कितपटाभिवीजनव्याजतोऽस्वयतां विजृम्भितम् ॥ ४० ॥

तालवृन्तकमवीजयद्वराकामुकस्य स कलिङ्गभूपतिः ।
व्यापकैः सह गुणैर्विभोस्तनूसौरभं जगति जृम्भयन्निव ॥ ४१ ॥

अर्हरत्नरुचिराङ्ककल्पनां हंसपेषरमणीयतान्विताम् ।
पूरितां शिशिरवारिपूरतो गौडभूपतिरधाद्गलन्तिकाम् ॥ ४२ ॥

तत्तदर्हविनियोगधन्यताभाजनैरितरपार्थिवोत्तमैः ।
पार्श्वक्लृप्तपरिचारसंभ्रमो भासते स्म नृपपाकशासनः ॥ ४३ ॥

आत्मदेशबहुमान्यतास्पदप्राभृतावलियुताः परःशताः ।
आसदन्नृपतयोऽस्य संमुखं दर्शकाकलितदर्शनक्रमाः ॥ ४४ ॥

प्राच्यभूमिपतयो महीभुजे प्रापयन्रुचिरवज्रपालिकाम् ।
शक्रतातिशयिभाग्यशालितां ख्यापयन्त इव कौतुकात्तदा ॥ ४५ ॥

प्रादिशन्विशदताम्रपर्णिकामौक्तिकावलिमिलासनोभुवे ।
सद्गुणैस्तव समेति भूभुजे दर्शयन्त इव दक्षिणागताः ॥ ४६ ॥

पश्चिमागतनृपालशेखरा भक्तिपूर्वमवनम्य पादयोः ।
भूभुजे निजभुजामहो यथा पद्मरागपटलीमुपाहरन् ॥ ४७ ॥

औत्तराः कतिचनावनीश्वरा हेमराशिमवनीहिमांशवे ।
प्रादिशन्बहुममुष्य धीरताप्रार्थनागतमिवामराचलम् ॥ ४८ ॥

पारसीकशकसिन्धुबाह्लिकारट्टदेशरमणा यथोचितम् ।
आसदन्समरसैर्हयोरसैः संभृतोपहृतयोग्यसंमुखम् ॥ ४९ ॥

विन्ध्यसिंहलकलिङ्गविश्रुता गन्धसिन्धुरघटा रणोद्भटाः ।
आनता विनयतोऽस्य संमुखं प्रापयन्कतिचन प्रजाधिपाः ॥ ५० ॥

भूषणैर्मणिमयैर्विभूषिताः पुत्रिकाः कनकपुत्रिकोपमाः ।
पार्थिवाय परिचारिका नृपाः प्राविशन्निजपदेन्दिरा इव ॥ ५१ ॥

इत्युपायनशतैरिलाधिपं स्वस्वभक्तिविभवानुसारतः ।
हर्षपूर्वमभजन्त मेदिनीमण्डलप्रथितमण्डलेश्वराः ॥ ५२ ॥

भट्टगौतमकणादपाणिनिव्यासमुख्यकृतशास्त्रवेदिनः ।
कोविदाः कुशलवाग्विजृम्भणैर्युक्तिशालिनमुपासताधिपम् ॥ ५३ ॥

काव्यनाटककलानुवादिनः सत्प्रगल्भतरतत्त्ववेदिनम् ।
प्रास्तुवन्नरपतिं परःशताः पण्डिता विमलमानवाहवः ॥ ५४ ॥

आशुमुख्यकविताध्वदर्शिनः पार्थिवस्य रचनाप्रगल्भताम् ।
अस्तुवन्सदसि हर्षतो मुहुर्गाढबोधरसिकाः कवीश्वराः ॥ ५५ ॥

माक्षिकेक्षुरसगोस्तनीसुधामाधुरीमधुरगीतिरीतिभिः ।
आकुमारकथमस्तुवन्गुणान्वैणिका वसुमतीवलद्विषः ॥ ५६ ॥

लास्ययोग्यबहुताललक्षणान्यत्यपूर्वमनिशं वधूततेः ।
कल्पयन्तमधिपं सकौतुकं प्रास्तुवन्सकलशास्त्रकोविदाः ॥ ५७ ॥

प्रथितसकलभूमीपालकोटीरकोटीप्रगुणगुणगणोद्यद्दीप्तिबालातपेन ।
अखिलनयनसद्मानन्दहेतुस्तदानीमवनितलसुधांशोरैन्धताख्यानसीमा ॥ ५८ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये पञ्चमः सर्गः

---

# षष्ठः सर्गः

ततः सभां तां मगधौ समेत्य लक्ष्मीविलासाभिधया लसन्तीम् ।
वंशानुपूर्वीं वसुधासुधांशोरशंसतां वाग्भिरतिप्रगल्भम् ॥ १ ॥

पयोजनाभेः पदपङ्कजातान्मरन्दधारेव मरुत्स्रवन्ती ।
जाता तदीयावरजा तथैव जातिर्यशःकन्दलजन्मभूमिः ॥ २ ॥

तस्यां प्रसूता धरणीमहेन्द्रा महौजसः केचन माननीयाः ।
तेषु प्रतीतेष्वजनि प्रकामं तिम्मक्ष्माभृत्तिलकः प्रतीतः ॥ ३ ॥

सरोजगर्भस्य सरस्वतीव पद्मेव पाथोरुहलोचनस्य ।
पतिव्रतासु प्रथमाभिधेया वय्याम्बिका तस्य बभूव भार्या ॥ ४ ॥

ततः प्रभावेण तयोरवन्यां प्रमोदहेतुः सकलप्रजानाम् ।
शरीरवान्धर्म इवाजनिष्ट चव्वाभिधानः क्षितिपालचन्द्रः ॥ ५ ॥

दाक्षिण्यसौशील्यदयादिमानां वाञ्छयार्थदानां व्रततीततीनाम् ।
उपघ्नभूमीरुहमुर्वरायामुर्वीमहेन्द्रं यमुदाहरन्ति ॥ ६ ॥

शोणाद्रिनाथं सुपदा समेत्य सुराः समस्ताः सुकरं भजन्ताम् ।
इत्येव यो हेममयं महेन्द्रपुरातिगं गोपुरमाततान ॥ ७ ॥

वियत्तले यो विबुधाग्रसीम्नि नित्यं नटन्त्या निजकीर्त्तिनट्याः ।
स्तम्भं यथा वृद्धगिरौ चकार स्फुरन्मणीगोपुरमिन्दुमौलेः ॥ ८ ॥

श्रीशैलनाथस्य सितांशुमौलेः प्राकारसोपानपरम्पराश्रीन् ।
स्वनामचिह्नान्सकलोपचारांश्चक्रे स्थिरं यो नृपसार्वभौमः ॥ ९ ॥

महान्ति दानानि मरुद्वृधायास्तटान्तिके दैवतमन्दिराणि ।
महाप्रहारांश्च महीमहेन्द्रश्चकार यः शाश्वतधर्मकेतुः ॥ १० ॥

भार्याभवत्तस्य धरावलारेर्मूर्त्यम्बिका मूर्तिमतीव कीर्त्तिः ।
आढ्या गुणैरच्युतरायदेव्याः सहोदरा श्लाघ्यतरप्रभावा ॥ ११ ॥

अपत्यभावेन तयोरवन्यामजायताम्भोजदलाक्ष एव ।
अनेकजन्मार्जितभाग्यराशिराकारवानच्युतभूमिपालः ॥ १२ ॥

विधाय हेम्ना रुचिरं विमानं रत्नैश्चिरत्नैरपि रङ्गधाम्नः ।
किरीटराजं च कृती चकार सिंहासनं चापि स राजसिंहः ॥ १३ ॥

रामेश्वरे राजकलाधरस्य समर्प्य कैङ्कर्यशतानि सम्यक् ।
खिलानि तीर्थान्यखिलानि सोऽयं चकार तत्रैव जगत्प्रसिद्धः ॥ १४ ॥

मुक्तातुलापूरुषमुख्यदानान्यसंख्यदेवायतनान्यवन्याम् ।
महाग्रहारान्स महामहिम्ना नित्यानि चक्रे नृपचक्रवर्ती ॥ १५ ॥

वर्ण्या कथं तस्य वदान्यता स्यादासेतुशीताचलमर्हदानैः ।
औदार्यभाजामवनीसुराणामश्नन्ति सत्रेष्वमरा यतस्ते ॥ १६ ॥

धरातुरासाहि धरातलेऽस्मिन्नार्योधने सोत्सुकतामवाप्ते ।
विपक्षतामात्मनि किं विचार्य क्षोभं तथा क्षोणिभृतो वहन्ते ॥ १७ ॥

भोगानुभूतौ पुरुहूत एव मनोभवो मानवतीजनेषु ।
विश्राणने वैबुधलोकशाखी विद्यासु सोऽयं विबुधोपदेष्टा ॥ १८ ॥

अगाधतामम्बुनिधेरवन्यामाकाशसीमावधिसंविभागम् ।
तत्त्वेन यो वेत्ति स एव वेद महागुणानां महिमानमस्य ॥ १९ ॥

सतीगुणानां वसतिः सतीव पद्मेव वाणीव जगत्प्रतीता ।
मूर्त्यम्बिका शोभनमूर्तिरस्य भार्याभवद्भव्यतरस्वचर्या ॥ २० ॥

सामन्तचक्रेश्वरसारसाक्षीसहस्रनित्याचरितोपचारा ।
भर्तुः प्रकामं बहुमाननीया बभूव सा प्राणसमासमाजे ॥ २१ ॥

कदाचिदन्तःपुरकामिनीभिरासेवितः सादरमुच्युतेन्द्रः ।
आत्मीयवाञ्छानुगुणं जगाद मूर्त्यम्बिकाया मुखमेक्ष्य वाचम् ॥ २२ ॥

प्रसादतो रङ्गपतेरवापमशेषभोगानतिमानवीयान् ।
पुत्रं विना भूधरणार्हमेते वराङ्गि सर्वे वनचन्द्रिकेव ॥ २३ ॥

आलोललम्बालकमाननाब्जमाबिभ्रतं पद्मदलायताक्षम् ।
आलोकये साध्वि कदात्मजातमव्यक्तवर्णालपनाभिरामम् ॥ २४ ॥

अनर्घरत्नस्तवकाभिरामामारोप्य डोलामधिनर्महर्म्यम् ।
पद्मेक्षणाभिः परिलाल्यमानं मरन्दधारामधुरैः सुगीतैः ॥ २५ ॥

कटीनटत्काञ्चनकिङ्किणीकललन्तिकालंकृतभालभागम् ।
आलक्ष्य दन्ताङ्कुरचारुहासमारब्धगेहाङ्गणपांसुकेलिम् ॥ २६ ॥

तरङ्गितस्तंन्यवचासुगन्धकपोलभागं शरदिन्दुकान्तम् ।
आलम्ब्य धात्रीकरमग्रतो मे पदानि भूमौ परिकल्पयन्तम् ॥ २७ ॥

एवंविधं नन्दनमिन्दुवक्त्रे भजेमहि श्रीरमणं प्रसाद्य ।
विना तपोभिर्विविधैर्जगत्यां भजन्ति के वा सुतरूपभाग्यम् ॥ २८ ॥

इत्यालपन्नेव तदा महीन्दुरिन्दीवराक्ष्या समभीप्सिताप्त्यै ।
रङ्गेशमुद्दिश्य रमासहायमैच्छत्तपः कर्तुमतीव भक्त्या ॥ २९ ॥

वातातपक्लेशसहो व्रतीव स राजसिंहः सहधर्मदारः ।
तपश्चचारोग्रतरं समस्तैः प्रस्तूयमानो नियमिप्रवेकैः ॥ ३० ॥

विहाय पाटीरविलेपनादि विहाय नाट्यादिविलोकनानि ।
तपश्चरन्तं तमवेक्ष्य भक्तमम्भोरुहाक्षः सहसाविरासीत् ॥ ३१ ॥

तपोनिदाघोदिततापमङ्गेष्वपारकारुण्यरसैरपाङ्गैः ।
निवारयन्तं निगमान्तवेद्यमाद्यं पुमांसं विभुरालुलोके ॥ ३२ ॥

आनम्य भक्त्या सहितोऽनुवेलमानन्दनिष्पन्दतराक्षिपक्ष्मा ।
प्राशंसदुर्वीपतिरिन्दिरायाः प्राणेश्वरं भाग्यमिव प्रसन्नम् ॥ ३३ ॥

भक्त्या महीभर्तुरमुष्य हृष्टः पद्मेक्षणो रङ्गपतिर्बभाषे ।
वाञ्छानुरूपं वसुधासुधांशो वृणीष्व सद्यो वितरामि भद्रम् ॥ ३४ ॥

एवं ब्रुवत्येव रमाहृदीशे प्रणम्य भूयः पदयोरमुष्य ।
हस्तौ समानीय तदावनीन्दुः पुत्रं ययाचे भुवनैकपूज्यम् ॥ ३५ ॥

अष्टादशद्वीपतलावनीपसदोपहारीकृतवस्तुजातम् ।
अशेषदेवायतनाग्रहारनित्यप्रतिष्ठापननिघ्नचर्यम् ॥ ३६ ॥

पारेपरार्ध्यद्विजपालिनित्यमृष्टान्नदानामितपुण्यराशिम् ।
अशेषभाषासमनुप्रकृप्तकवित्वदीव्यद्घटिकाप्रबन्धम् ॥ ३७ ॥

समुद्रदुर्गस्थलमध्यवासिप्रत्यर्थिसत्ताङ्गहतिप्रवीणम् ।
पादानतारातिनृपालराज्यपुनःप्रतिष्ठापनभूरिकीर्त्तिम् ॥ ३८ ॥

अचेलविद्वेषिबलातिभीमसंग्रामभूसाहसविक्रमार्कम् ।
अपारकल्याणगुणापदेशमणीगणावासमहाम्बुराशिम् ॥ ३९ ॥

इति ब्रुवन्तं तमुवाच शौरिरेवंविधः कश्चिदिलातलेऽस्मिन् ।
नास्त्येव तस्मात्तव नन्दनत्वं प्राप्स्यामि भावत्कतपःप्रसन्नः ॥ ४० ॥

एवं ब्रुवन्नेव हरिस्तदानीमन्तर्दधे साकममर्त्यसंघैः ।
अथ स्वपत्न्या सममच्युतेन्दुरविन्दतानन्दममन्दमन्तः ॥ ४१ ॥

वरप्रभावाद्वनजेक्षणस्य वसुंधराशाश्वतवैभवाय ।
मूर्त्यम्बिका भर्तृमुदा सहैव बभार सा गर्भभरं शुभाङ्गी ॥ ४२ ॥

कान्तामणीगर्भजुषोऽर्भकस्य प्रचीयमानैर्यशसां प्ररोहैः ।
आलक्ष्यमाणेव तदाजनिष्ट गात्रैः क्रमाद्बालमृणालकल्पैः ॥ ४३ ॥

तनूभुवो गर्भजुषस्तदानीं गुणप्रकर्षानुगुणं मृगाक्ष्याः ।
अनन्यसामान्यमभूदमुष्या मनोरथानां महिमप्रचारः ॥ ४४ ॥

परःशताभिः परिचारिकाभिर्निषेव्यमाणापि नृपालपत्नी ।
अरातिकान्ताचरितेषु नित्यं नवोपचारेषु परं ननन्द ॥ ४५ ॥

तलोदरीभिर्धरणीपतीनामुपायनैर्नित्यमुपास्यमाना ।
वाञ्छाधिकं वस्तु वधूमणी सा प्रदातुमैच्छत्प्रमदेन तासाम् ॥ ४६ ॥

सखीजनैः सादरकथ्यमानाः कथा वधूनां गणयांबभूव ।
अरातिकान्ताभयदानयाच्ञावाक्यानि चक्रे श्रवसोर्वतंसम् ॥ ४७ ॥

सा संनताङ्गी समये सखीनां परःशताभिः परिलालनाभिः ।
पुष्यत्प्रतीकाजनि पूर्वपक्षनिशावरीभिर्विधुरेखिकेव ॥ ४८ ॥

असूर्यभाजाभिहितप्रभावं प्रांशुस्थितेन ग्रहपञ्चकेन ।
शुभे मुहूर्ते सुदिने सुगात्री कुलप्रदीपं सुषुवे कुमारम् ॥ ४९ ॥

महीशपाशा महिपात्मजेन निवारिता एव निजान्तरस्थाः ।
भवन्ति यावज्जगतीति भाविप्रमोदनेनेव दिशः प्रसेदुः ॥ ५० ॥

अमुष्य दानैरवनीसुरेन्द्राः सदा विधास्यन्ति समस्तयज्ञान् ।
एवं विचिन्त्येव तदा प्रमोदात्प्रदक्षिणार्चिः प्रणनर्त वह्निः ॥ ५१ ॥

अमुष्य सेवावसरेष्ववेलमुर्वीश्वराङ्गीजितचामरौघैः ।
महत्त्वमेष्यामि सदेति मत्वा मरुच्चचाराखिलमाननीयः ॥ ५२ ॥

सुमध्यमाभ्यः सुतजन्मवार्तां संजल्पितुं सत्वरमागताभ्यः ।
प्रागेव भूमीपतये शशंस मञ्जीरनादो मधुरस्तदीयः ॥ ५३ ॥

कुमारनाम्नः कुलभूषणस्य मणीविभूषा न समा महार्घाः ।
इत्येव ताः प्रादिशदच्युतेन्द्रो जनाय तज्जन्मनिवेदयित्रे ॥ ५४ ॥

गन्धोदकैः काञ्चनकुम्भनीतैः संस्नाय सौवर्णपदीं दधानः ।
दानान्यसंख्यानि धरामरेभ्यः प्रादान्महीन्दुः प्रभुतानुरूपम् ॥ ५५ ॥

पुरातनैरद्यतनैश्च पुण्यैः पुत्रत्वभाजः पुरुषोत्तमस्य ।
राजा स चक्रे रघुनाथनाम शास्त्रोक्तमार्गेण सधर्मदारः ॥ ५६ ॥

बाल्योचिताभिः परिलालनाभिः प्रतिक्षणं तौ बहुमानयन्तौ ।
जायापती संततजायमानप्रमोदसंपद्भरितावभूताम् ॥ ५७ ॥

कलाः समस्ताः क्रमतः समेत्य प्रवृद्धिभाजं नरपालसूनुम् ।
प्रजा व्यलोकन्त तदा प्रमोदात्पतिं रजन्या इव भासमानम् ॥ ५८ ॥

विद्याविवेकविनयादिमजन्मभूमिं विश्वंभराजनविलोचनभागधेयम् ।
आनन्दसान्द्रहृदयावनुवेलमात्मजातं विलोक्य जननीजनकावभूताम् ॥ ५९ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये षष्ठः सर्गः

## सप्तमः सर्गः

अथात्मभूरच्युतभूवलारेरथाढ्यो भूषणमङ्गकानाम् ।
अनङ्गदर्पोदयमङ्गनानां विलाससाफल्यविधानिधानम् ॥ १ ॥

घनेन यस्योज्ज्वलकैशिकेन संतर्ज्यमानाभ्रमरा मयूराः ।
भवन्ति भीताः परथा भजन्ते किं ते वनान्ते गिरिगह्वराणि ॥ २ ॥

मुखाब्जलावण्यमुधासुधाब्धौ समुद्गतो यस्य शशी ललाटम् ।
अद्धा न चेदायतलोचनाग्रात्पाटल्यसंख्या प्रभवेत्कथं वा ॥ ३ ॥

मन्यामहे यस्य महीवलारेर्भ्रूकिंकरं मन्मथपुण्ड्रचापम् ।
यच्छासनादेष वशीकरोति येनाङ्गनानां हृदयान्तराणि ॥ ४ ॥

समीक्षितुं यस्य वधूसहस्रमनेकनेत्राण्यपि कर्तुकामः ।
विधाय वेधा नयने विशाले संमोदतेऽसौ सफलस्वयत्नः ॥ ५ ॥

अखण्डभोगैरवनौ समेतमाखण्डलं यं नृपमारचय्य ।
चक्षुःसहस्रस्य समं व्यतानीदम्भोजभूरक्षियुगं विशालम् ॥ ६ ॥

विलोचने यस्य विभोर्विशाले पयोरुहे चेतसि भावयामि ।
प्रकाशमाने भवतो यदेते पयोजबन्धोः परिषेवणेन ॥ ७ ॥

आपाटलं यस्य विभोरपाङ्गं साम्राज्यचिह्नं समवेक्ष्य नित्यम् ।
विशिष्य चेतोविभवानभिज्ञाः सामन्तभूपाश्चकिता भवन्ति ॥ ८ ॥

शृङ्गारतत्त्वश्रवणे मनोज्ञे समं यदीयश्रुतितां श्रयेते ।
सत्यं न चेदत्र तयोर्जगत्यां संजायते किं श्रवणप्रतीतिः ॥ ९ ॥

भृङ्गोचिता गन्धफली सुमेषु समेयुषी माधवसंनिधानम् ।
भाग्येन नासापदमेत्य यस्य निषेव्यते श्मश्रुनिभेन भृङ्गैः ॥ १० ॥

आलोक्य दन्ताङ्कुरवेषरम्यां मुक्तावलिं यस्य मुखारविन्दे ।
महीतले मौक्तिकजन्मभूमिं शंसन्ति सर्वे सरसीरुहाणि ॥ ११ ॥

वचःसुधाब्धौ वसुधासुधांशोर्यस्याधरं विद्रुममेव जातम् ।
मन्ये न चेत्कारणतः प्रसक्तं महीयते किं मधुरत्वमस्मिन् ॥ १२ ॥

हातुं कलङ्कं सुकृतातिरेकादास्यं यदीयं तुहिनांशुरासीत् ।
तथापि तं नोज्झति पार्श्ववर्ती नित्याश्रयः श्मश्रुनिभात्स एषः ॥ १३ ॥

उज्जृम्भ्य देहादुदितः शिरोग्रे शृङ्गारपूरश्चिकुरापदेशात् ।
प्रस्यन्दते यस्य मुखारविन्दपार्श्वद्वये श्मश्रुभरच्छलेन ॥ १४ ॥

पयोजनाभेः करपाञ्चजन्यं मान्यं समान्यो मम नैव तुल्यः ।
कम्बुस्त्रिलोक्यामिति यस्य कण्ठो व्यनक्ति रेखात्रयवैभवेन ॥ १५ ॥

पश्यामि यस्योज्ज्वलबाहुकल्पशाखायतत्वातिशये निदानम् ।
विख्यातनानाविधनित्यदानप्रक्लृप्तधारालपयोनुषङ्गम् ॥ १६ ॥

मर्त्यावतारं मधुसूदनस्य जयेन्दिराणां समुपेष्यतीनाम् ।
अश्रान्तलीलागृहतामवाप्तुं बाहान्तरं यस्य पृथुत्वमेति ॥ १७ ॥

भद्रेभकुम्भप्रतिमावुरोजौ विधाय वेधा विपुलेक्षणानाम् ।
अकल्पयत्तत्परिरम्भणार्हं वक्षःस्थलं यस्य विभोर्विशालम् ॥ १८ ॥

अनर्घरत्नाभरणाश्रयस्य यस्यांसकूटौ हृदि भावयामि ।
निवेदयन्तौ निजतारतम्यं श्रवोन्तिके रोहणरत्नसानू ॥ १९ ॥

अङ्गानि यस्यातिमृदूनि कृत्वा कराब्जयुग्मं कठिनं व्यतानीत् ।
धाता न चेद्दानविधौ कथं स्याद्गाङ्गेयरत्नादिकघर्षयोग्यम् ॥ २० ॥

कण्ठीरवः पर्वतराजकन्यां भजन्सदा तत्करुणाभरेण ।
आप्नोति यन्मध्यमतामवन्यां किं वा तपोभिः कृतिनामलभ्यम् ॥ २१ ॥

मध्यस्थलीं यस्य महीवलारेरतीव सूक्ष्मामतनोद्विधाता ।
तथा न चेदायतरोमवल्लिराविर्भवेदेवमनाश्रया किम् ॥ २२ ॥

ऊरू यदीयौ रुचिरोरुवृत्तौ स्तम्भद्वयं हेममयं स्मरामि ।
न चेत्कथं वात्र नतोदरीणां संदानिताः स्मान्तगजा भवन्ति ॥ २३ ॥

अमुक्तरूपातिशयोरुजङ्घविवादमाध्यस्थ्यविधिं समेति ।
जानुद्वयं यस्य सदेति दीर्घौ प्रदर्शयेते किमु बाहुकाण्डौ ॥ २४ ॥

जानुद्वयं श्लक्ष्णतरं यदीयमालक्ष्यनम्रक्षितिपानुबिम्बम् ।
आलोक्य जानून्यत एव नूनमाख्याति लीलामुकुरानवन्याम् ॥ २५ ॥

अधैर्यभाजामवनीपतीनामंसाधिरोहादपि माननीयः ।
पादाश्रयोऽस्येति परं निषङ्गौ जङ्घात्मना यस्य विभोर्विभातः ॥ २६ ॥

अवेलरूपातिशयस्य यस्य पदावलम्बं प्रमदातिरेकात् । [1]
* * * * * ॥ २७-२९ ॥

पयोरुहं यस्य पदद्वयेन पराजितं प्राप्य स पञ्चबाणः ।
जयत्यशेषां जगतीं यदेवं तदेव तस्यातिशयं व्यनक्ति ॥ ३० ॥

पयोजरेखा चरणौ यदीयौ पयोजरेखाच्छलतः प्रपद्य ।
पद्मानिवासत्वमुपैति भाग्यात्तदाश्रया भूमिधवावलीव ॥ ३१ ॥

अथाहतं वज्रमधः पदाभ्यामित्येव मत्वा हृदि रोहणाद्रिः ।
आसेवते यं विनतावनीशमाणिक्यदीव्यन्मकुटापदेशात् ॥ ३२ ॥

अहर्दिवं नम्रनृपालभालबालेन्दुसंस्पर्शपराशया किम् ।
संभूय यस्याङ्घ्रिसरोरुहाग्रनखापदेशान्निवसन्ति ताराः ॥ ३३ ॥

एवं शुभाकारसमेतमेतं हर्षोदयादच्युतभूमहेन्द्रः ।
अग्राहयत्पाणिमथात्मजातं पाण्ड्यादिभूपालककन्यकानाम् ॥ ३४ ॥

अनन्तरं श्लाघ्यगुणातिरेकलक्ष्यं प्रजारक्षणलक्षणाढ्यम् ।
ऐच्छद्विधातुं विभुरच्युतेन्द्रो युवानमेनं युवराजसंज्ञम् ॥ ३५ ॥

नृपावतंसस्य तदा निदेशान्महाशया मन्त्रिवराः सहर्षम् ।
पट्टाभिषेकोचितवैभवानि प्रावर्तयन्पत्तनवीथिकासु ॥ ३६ ॥

वाहप्रकाण्डैर्नृपवाहयोग्यैः शृङ्गारवद्भिर्मदसिन्धुरौघैः ।
अशेषदेशागतभूपवर्गैरलक्ष्यत क्ष्मापगृहान्तरालम् ॥ ३७ ॥

महार्हनानामणितोरणालिसंभाव्यरम्भातरुसंविधाने ।
विलोचनानन्दविधायिवारविलासिनीलास्यकलाविलासे ॥ ३८ ॥

प्रसूनदामप्रकरानुषङ्गिप्रालम्बिमुक्तास्तबकप्रपञ्चे ।
अवेलकृष्णागरुधूपधूमसौरभ्यसंक्रान्तदिगन्तराले ॥ ३९ ॥

1. The portion relating to VV. 27—29 is omitted in the ms.

सभान्तरे तत्र शुभे मुहूर्ते महत्तरे मङ्गलतूर्यघोषे ।
आरोपयन्नन्दनमच्युतेन्दुः सिंहासनं संश्रितराजचिह्नम् ॥ ४० ॥

राज्याभिषेके रघुनाथनेतुः पादाम्बुजे हेममयैः प्रसूनैः ।
अभ्यर्च्य नीराजनमात्ममौलिमाणिक्यदीपैर्महिपा व्यतन्वन् ॥ ४१ ॥

ऊर्ध्वं प्रयत्नाच्चिरमुर्वरायां भरं तनूजाय परं वितीर्य ।
अवाप तस्मादवनीसुधांशुरानन्दमानन्दभरं स्वयं च ॥ ४२ ॥

अतिप्रगल्भैरथ पारसीकैः समं प्रवृत्ते सति संपराये ।
कर्नाटरक्षाकरणे नितान्तं विचारवान्वेङ्कटदेवरायः ॥ ४३ ॥

गन्धान्धभूमीध्रगन्धनागकण्ठीरवं शौर्यकथानिधानम् ।
रणे सहायं रघुनाथभूपमयाचतोर्जस्वलमच्युतेन्द्रम् ॥ ४४ ॥

आकर्ण्य तद्वाक्यमथाच्युतेन्द्रो बाल्याभिमानी तनये प्रगल्भे ।
साह्यं विधातुं स्वयमेव तस्मै निश्चित्य धीरां निजगाद वाचम् ॥ ४५ ॥

गन्धर्वसंघैर्जितगन्धवाहैरनेकसंग्रामविधाभिज्ञाः ।
परःशतास्ते युधि पारसीका नृपाल बालेन कथं निवार्याः ॥ ४६ ॥

आरट्टकाम्भोजहयाभिरामैरद्रीन्द्रकल्पद्विरदातिलक्ष्यैः ।
बलैः समेतः प्रधनेऽहमेव समीहितं ते सफलीकरिष्ये ॥ ४७ ॥

इति ब्रुवाणं धरणीशचन्द्रं विलोक्य तं वेङ्कटदेवरायः ।
सौहार्दयुक्तं चतुरं हितं च जगाद वाक्यं समयानुकूलम् ॥ ४८ ॥

बहुप्रकारैर्नृपतिप्रवेक प्रत्यर्थिपृथ्वीपतयो मदीयाः ।
संग्रामभूमीषु जगत्प्रसिद्धं खण्डीकृतास्ते खरखड्गवल्ल्या ॥ ४९ ॥

तथापि किंचित्तव कार्यभागमावेदये रात्रिचरांशजाताः ।
दाक्षिण्यसत्कर्मदयाविहीनाश्चरन्ति लोके यवनाः सगर्वाः ॥ ५० ॥

पयोरुहाक्षांशभवं विनान्यैर्वार्या न ते भूपवरैर्महीन्द्रो ।
तस्मात्सहायं तनयं प्रयच्छ रामावतारं रघुनाथभूपम् ॥ ५१ ॥

बालोऽपि भूपाल तनूभवस्ते शौर्यान्वितः श्लाघ्यगुणैः समेतः ।
अनेकशास्त्रास्त्रविदाह्वयज्ञः प्रज्ञानिधिः सर्वकलाप्रवीणः ॥ ५२ ॥

गाधेयमौनिक्रतुविघ्नहेतून्रक्षांसि भूयांसि रघुप्रवीरः ।
विदारयामास विशिष्य बाल्ये तथैव धीरस्तव नन्दनोऽयम् ॥ ५३ ॥

प्रगल्भमेनं प्रहिणु क्षितीश भजस्व तां पङ्क्तिरथस्य कीर्त्तिम् ।
इतः प्रभृत्येव मम क्षमायां सिंहासनं च स्थिरतामुपैतु ॥ ५४ ॥

तादृग्विधं तस्य वचो निशम्य विचिन्त्य विष्णोश्च वरप्रसादम् ।
तथेति धीरं तनयं नयाढ्यं प्रास्थापयत्सर्वबलानुयातम् ॥ ५५ ॥

गुरोर्निदेशाद्गुरुराजकार्यनिर्वाहको नीतिपथाध्वनीनः ।
सामन्तभूपालशतानुयातो जयप्रयाणाय समुद्यतोऽभूत् ॥ ५६ ॥

बलेन साकं बलगर्वितेन संग्रामयोग्यैर्जयतूर्यघोषैः ।
आपूर्यमाणे हरिदन्तराले नृपावतंसो निरगान्नगर्याः ॥ ५७ ॥

मध्येपथं मध्यमलोकपालैरुत्पादिताः साधु नवोपकार्याः ।
अध्यास्य वस्तुप्रकराभिरामा जनाधिनाथः समभावयत्तान् ॥ ५८ ॥

गन्धापणोद्यन्मृदुगन्धवाहैरध्वश्रमं सैन्यगतं हरन्तीम् ।
समासदच्चन्द्रगिरिप्रतीतां पुरीं नृपालः पुरुहूतकल्पः ॥ ५९ ॥

कटाक्षयंस्तामथ कैश्चिदेव प्रभुः प्रयाणैः पेनुगोण्डनाम्नीम् ।
कर्नाटनेतुः कुलराजधानीमालोककासेचनिकामयासीत् ॥ ६० ॥

तत्रावनीन्दुस्तरलेक्षणाभिः सौधेषु चामीकरजालकेभ्यः ।
अङ्कूरितप्रेमभरैरपाङ्गैरालक्षितः साङ्ग इवाङ्गजन्मा ॥ ६१ ॥

वीराग्रणीर्वेङ्कटदेवरायविनिर्मितैर्नैकविधोपचारैः ।
उदूढहर्षः स नवोपकार्यामध्यास्त तस्यामवनीशसूनुः ॥ ६२ ॥

कर्नाटरक्षाकरणाय तूर्णं समागतं तं सह सैन्यसंघैः ।
आकर्ण्य चारैरभजन्नवद्वारा वनानि केचिद्यवना निगूढाः ॥ ६३ ॥

आरक्तनेत्राञ्चलभीषणास्यैरमुक्तगर्वोन्मिषिताट्टहासैः ।
आरूढकाम्भोजहयैर्भटौघैरभिद्रवन्ति स्म तदा तमन्ये ॥ ६४ ॥

नाराचपातैर्नरदेवसूनोः पलायमानाश्च रणे पतन्तः ।
भयाकुलत्वाद्भयार्थिनस्ते रामास्त्रतो रात्रिचरा इवासन् ॥ ६५ ॥

प्रख्यातबल्लालपुरादिसर्वदुर्गान्तरस्थाः परदुर्निरीक्षाः ।
मुहुर्नदन्तो मुरसा महीपं प्रत्युद्ययुर्जग्मिर स रणे प्रतीताः ॥ ६६ ॥

उदस्तनानायुधसत्त्वजातः परिभ्रमद्वाजिजलभ्रमीकः ।
तद्वाहिनीशातिशयो धरेन्द्रोरालोकनाच्चित्रमभूत्प्रशान्तः ॥ ६७ ॥

विजित्य युद्धे विमतानशेषान्कर्नाटभूमीकमिलुस्तदानीम् ।
स्थलानि दुर्गाणि जगत्प्रसिद्धं वशंवदान्यस्य विभुर्व्यतानीत् ॥ ६८ ॥

अभ्यागमात्तस्य निजारिवर्गे विसंस्थुले वेङ्कटदेवरायः ।
प्रमोदमानः सह बन्धुवर्गैरमन्यत स्वं स्थिरमाधिपत्यम् ॥ ६९ ॥

राज्ञां समक्षं रघुनाथभूपं प्रशस्य भूमीपतिरेवमूचे ।
अभ्यागमादेव तवाजनिष्ट निष्कण्टकं राज्यमिदं नृपाल ॥ ७० ॥

इति ब्रुवन्सादरमेव योग्यान्भूमीभुजे वाहनभूषणादीन् ।
विश्राणयन्वेङ्कटदेवरायो बलाढ्यमेनं बहु मन्यते स्म ॥ ७१ ॥

अत्रान्तरे भूपकुलावतंसस्तुण्डीरनाथं परिदूयमानम् ।
काराश्रितं तत्प्रमदाकदम्बादाकर्णयद्दीनजनावलम्बः ॥ ७२ ॥

तदात्व एवार्तधराधिनाथरक्षैकतानो रघुनाथभूपः ।
कारास्थितं कृष्णपनायकं तं व्यमोचयद्वेङ्कटदेवरायात् ॥ ७३ ॥

तुण्डीरनाथः सवधूरनाथः प्रणम्य भक्त्या पदयोरमुष्य ।
करं स्वसुर्ग्राहयति स्म सद्यो रक्षाधुरीणं रघुनाथमेनम् ॥ ७४ ॥

जयश्रिया तां जनपालकन्यां समं गृहीत्वा स महीमहेन्द्रः ।
अगात्पुरीमात्मविलोकनोत्कपौराङ्गनाध्यासितसौधभागाम् ॥ ७५ ॥

कर्नाटसिंहासनकार्यभारं निर्वर्त्य सर्वं विनिवर्तमानम् ।
अथाच्युतक्ष्मापतिरात्मसूनुं प्रत्युज्जगाम प्रमदातिरेकात् ॥ ७६ ॥

तदा समन्तं पदयोस्तनूजमालिङ्ग्य दोर्भ्यामवनीसुधांशुः ।
कुलं यथेक्ष्वाकुकुलं स्वकीयं प्रतिष्ठितं भावयति स्म चित्ते ॥ ७७ ॥

नीराजनाभिर्मणिनिर्मिताभिराचारलाजैरपि राजसूनुः ।
पुरस्कृतः पौरपुरंध्रिकाभिः समासदत्सद्म निजं सहर्षः ॥ ७८ ॥

कर्णाटस्त्रीकर्णताटङ्कधाने प्रौढं क्षोणीपालने लब्धवर्णम् ।
पुण्यश्लोकं वीक्ष्य पुत्रं तदा स्वमानन्दाब्धावच्युतेन्दुर्विजह्रे ॥ ७९ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये सप्तमः सर्गः

---

## अष्टमः सर्गः

अथाच्युतक्षितिरमणात्मसंभवो निषेवितः प्रबलनृपालपालिभिः ।
अधिष्ठितो मणिमयमासनं व्यभाद्ध्रुवं श्रितः सदसि पुरंदरो यथा ॥ १ ॥

सभान्तरं प्रति समुपागतास्तदा महीसुराः कतिचन मन्त्रपूर्वकम् ।
उपायनान्युदितमुदः समार्पयन्महीभुजे फलितमनोरथोदयाः ॥ २ ॥

अथ ते यथोचितमशेषवेदिनं विभुमेत्य वृत्तमखिलं व्यजिज्ञपन् ।
भवदीयबाहुपरिरक्षिता वयं न्यवसाम यज्ञनिरता निरन्तरम् ॥ ३ ॥

रघूद्वहस्त्वं रघुनाथभूप कोदण्डदीक्षागुरुरेव साक्षात् ।
शक्तिः प्रजारक्षणजागरूका न चेत्किमेषास्ति नृपालकेषु ॥ ४ ॥

भूमीनाथ त्वद्भुजापूर्वशैले तेजोभानौ संततं दीप्यमाने ।
क्षोभं वैरिक्षोणिपाला भजन्ते घूकप्रायाः कुम्भिनीभृद्गुहासु ॥ ५ ॥

नमतां रघुनाथ पार्थिवानां प्रमदं भूमिभरार्पणाद्विधत्से ।
जगतीभरसंहृतेः परेषां तनुषे तापमतीव तद्विचित्रम् ॥ ६ ॥

भूमीश्वरैर्जगति विठ्ठलराजपूर्वैरन्यैरमेयबलशालिभिरप्यजेयः ।
आराध्य भैरवमवाप्य वरं दुरापं शूराग्रणीश्चरति चोलगनामधेयः ॥ ७ ॥

अधिपयोधि दशास्य इवापरः प्रबलबाहुबलः परदुःसहः ।
जगदशेषमिदं जगतीपते क्षुभितमेव करोति स चोलगः ॥ ८ ॥

कथमिदं कथयाम कृपानिधे शृणु नृपाल स चोलगरावणः ।
प्रतिदिनं हरते पतिदेवताः परवधूरनिवार्यपराक्रमः ॥ ९ ॥

अत्र चोलगदशास्ययोः समे वार्धिवासवसुधातिपीडने ।
पङ्क्तिरास्यजलजानि बाहवो विंशतिः सुररिपोर्विशेषणम् ॥ १० ॥

धरणीधव दुर्गुणास्तदीया बहवः सन्ति कथं प्रचक्ष्महे तान् ।
शरणं जगतः शरण्यमार्ताः समुपेमः समये भवन्तमेते ॥ ११ ॥

श्रुत्वा तदा सदसि चोलगदुष्टचेष्टामापाद्य भूदिविषदामभयप्रदानम् ।
वीराग्रणीः स रघुनाथविभुः समस्तैरस्तूयत द्विजवरैरतिमोदमानैः ॥ १२ ॥

अथ वेत्रिजनोऽवदन्महीशं नृप नेपालनृपालकोऽतितूर्णम् ।
भवनाङ्गणमेत्य बन्धुवर्गैः समयं संप्रति वीक्षते त्वदीयम् ॥ १३ ॥

इतीरयन्तं तमवेक्ष्य सोऽयमानीयतामित्यवनीबिडौजाः ।
अर्हैः पुरस्कार्यं तदात्मनीनैरास्थानसीमानमनीनयत्तम् ॥ १४ ॥

स्वागतं वदति सादरमेनं मञ्जुवाग्भिरवनीपहिमांशौ ।
अन्तरीपपतिरानतमौलिर्व्याहरद्विनयतो निजवृत्तम् ॥ १५ ॥

चिनचेव्वयभूपशेखरेण प्रथितेनाच्युतभूमिपालकेन ।
मकुटाभरणा ममैव वंश्या रघुनाथक्षितिनाथ रक्षितास्ते ॥ १६ ॥

तव नामधेयवहनं धरातले मम राज्यरक्षणमहत्त्वकारणम् ।
प्रथितान्तरीपनरपालशेखरैर्विदिता कथेयमधुना विशां पते ॥ १७ ॥

महीपते मम कुलजैर्महाभुजैः पराजिताः समिति परङ्गिवंशजाः ।
तदादि ते मनसि दृढं विरोधितां प्रदर्शयन्त्यत्रमतिपङ्करूषिताः ॥ १८ ॥

तत्तादृग्भुजमहसस्तरीसमेता मत्तास्ते करवलमानमण्डलाग्राः ।
कल्पान्तज्वलनकरालनेत्रकोणा निःशङ्कं सलिलनिधौ चरन्ति नित्यम् ॥ १९ ॥

मय्यारामालोकने मग्नचित्ते वेलां सर्वे ते विचार्यैव तूर्णम् ।
वप्रैर्दीप्रां वार्धिखेयां पुरीं मे संघीभूय च्छद्मकृत्यैरगृह्णन् ॥ २० ॥

नरपते सकलं नगराद्बहिर्विरचितं विमतैर्विषमं तदा ।
चरमुखादवकर्ण्य सरित्पतिं परिविलङ्घ्य भवन्तमशिश्रियम् ॥ २१ ॥

इति धरणिधवेऽस्मिन्नीरयत्यात्मवृत्तं सदसि स रघुनाथक्ष्मापतिः प्रत्यवादीत् ।
अरिवशमपि भूयोऽप्याधिपत्यं समस्तं निजकरगतमेवावेहि नेपालभूप ॥ २२ ॥

इति वादिनि मेदिनीश्वरेऽस्मिन्नवहत्संमदमन्तरीपभूपः ।
अथ कश्चिदुपागतो विनीत्या समयज्ञः समभाषतावनीशम् ॥ २३ ॥

कर्नाटभूपाश्रयिभिः कृतज्ञैः कैश्चिन्महीशैर्नृप राजकार्यम् ।
संजल्पितुं संप्रति संमुखे ते संप्रेषिताः सत्वरमेव चाराः ॥ २४ ॥

इतीरयित्वा स महीशमौलेरपाङ्गसंज्ञामवगम्य चारान् ।
अनीनयत्संमुखमानतास्ते न्यवेदयन्नीतिविदे विधेयम् ॥ २५ ॥

विष्णोः पदं श्रयति वेङ्कटदेवराये सर्वे तदीयसचिवा युवराजसूनुम् ।
भद्रासने तदनु भूभरणाय तूर्णं श्रीरङ्गरायनृपशेखरमभ्यषिञ्चन् ॥ २६ ॥

तस्मिन्महीं शासति तं समस्ताः पुरातना भूपतयोऽभजन्त ।
द्रोहं विधातुं द्रुतमैच्छदस्मै जनाधिनाथाय स जग्गराजः ॥ २७ ॥

सानुजो निशि स जग्गमहीशः पार्थिवस्य भवनं परिवेष्ट्य ।
भूपतिं तदनु पुत्रकलत्रैर्निर्घृणो निहतमातनुते स्म ॥ २८ ॥

तनयेषु नृपाल तस्य कंचिच्छिशुमाप्तो रजकः समेत्य शीघ्रम् ।
अनयन्नगराद्बहिर्निशायामतिचौर्याद्द्विषतामनक्षिलक्ष्यम् ॥ २९ ॥

केचिदेनमुपगम्य कृतज्ञाः पार्थिवास्तदहितान्प्रतिकारम् ।
नेतुमक्षमतया नृपतेऽस्मान्प्रापयन्परिसरं भवदीयम् ॥ ३० ॥

आपदां पदमनन्यशरण्यं राजपुत्रमवनीरमण त्वम् ।
सिंहपीठमधिरोपय शीघ्रं जग्गराजमहिपं जहि युद्धे ॥ ३१ ॥

बाल्येऽपि सिंहासनकार्यभागः कृतस्त्वया कीर्तिनिधे पुनश्च ।
स एष कार्यः सकलप्रयत्नाद्भुजाबलाढ्यो भुवने त्वमेव ॥ ३२ ॥

इत्थं चारैरीरितं रायवृत्तं श्रुत्वा सर्वं क्षोणिपालाग्रगण्यः ।
कर्तुं तूर्णं कार्यमेतत्तदानीं धीरोत्तंसो व्याहरन्मन्त्रिवर्यान् ॥ ३३ ॥

सिन्ध्वन्तरीपगतचोलगशिक्षणं च नेपालदेशनृपशात्रवनिग्रहश्च ।
कर्णाटभूपतिनवीकरणं च सर्वमापाद्यमेव मम दिग्विजयापदेशात् ॥ ३४ ॥

सर्वे भवन्तः सकलेषु नीतिशास्त्रेषु दक्षाः सपदि प्रवृत्ते ।
कार्यत्रयेऽस्मिन्कतमद्विधेयमाचक्षतामद्य यथार्हमादौ ॥ ३५ ॥

इति ब्रुवन्तं सचिवा महीश्वरं व्यजिज्ञपन्नीतिविशेषवेदिनम् ।
गुरोर्भवानेव गुरुर्धरापते भवत्समानो भविता कथं सुधीः ॥ ३६ ॥

अस्माभिरावेद्यमिहास्ति किं ते तथापि किंचिन्नयतत्त्वमद्य ।
विज्ञापयामो विदितं यथार्हमङ्गीकुरुष्वावनिलोकचन्द्र ॥ ३७ ॥

धीरोदात्तो देवतान्यस्तभारः शौर्योपेतः सत्यसंधो दयालुः ।
त्यागी विद्वान्दीनरक्षाधुरीणो भूमीपालः पूज्यते भूतलेऽस्मिन् ॥ ३८ ॥

चतुरुपायविदत्र जनाधिपो जगति शत्रुगणं जयति क्रमात् ।
बलपराक्रमवान्यदि पार्थिवो विदलयत्यचिरेण विरोधिनः ॥ ३९ ॥

अनेकयत्नार्जितमप्यसंख्यं धनं वितीर्यैव धराधिनाथः ।
जयेन्दिरासंवननैकयोग्यं क्रीणाति धन्यो भुवि कीर्त्तिहारम् ॥ ४० ॥

नान्यो जनो नरपतेः परिरक्षणीयः संरक्षितोऽपि तमये समये विमुञ्चेत् ।
संवर्धितः परभृता समये प्रपन्ने सद्यस्तमेव कलकण्ठयुवा जहाति ॥ ४१ ॥

भूपः प्रतापसहितोऽपि भुजाबलं स्वं नैव प्रकाशयति चेद्द्विमतो न शाम्येत् ।
अत्युज्ज्वलोऽपि तपनो निजमंशुजालं नैव प्रपञ्चयति चेन्न तमो विशीर्येत् ॥४२॥

सकलस्पृहणीयसद्गुणाढ्यं जननाथं जगतीजना भजन्ते ।
भ्रमरा इव संततं प्रहृष्टाः सहकारं नवसौरभाभिरामम् ॥ ४३ ॥

महीपतौ समिति भुजामहोधिके प्रसन्नतां सपदि भजन्ति पार्थिवाः ।
दिनाधिपे दिवसमुखेऽतिभासुरे महीतले सरसिजमण्डला इव ॥ ४४ ॥

आत्मबुद्ध्यनुगुणं महीभुजे वेदयन्ति विदितानि मन्त्रिणः ।
वेदितेष्वपि च साधु विन्दते पार्थिवो मणिपरीक्षको यथा ॥ ४५ ॥

कार्याणि नैकविधमार्गगतानि राजा संधाय साधयति साधु समीहितं स्वम् ।
शीर्णानि हेमशकलानि शनैः कलादः संगृह्य योजयति साधु परिष्क्रियात्वे ॥ ४६॥

सूचीकटाहनयतः सुचिरं विचार्य कार्येषु साधु भवता कथितेषु तेषु ।
आदौ सलीलमवनीरमणावतंस कार्या विशिष्य ननु चोलगगर्वशिक्षा ॥ ४७॥

एवं विनीत्येव यथार्हमेतद्विज्ञाप्य कार्ये विरतेषु तेषु ।
आलोक्य सर्वानथ वाहिनीशानाज्ञापयद्भूपकुलावतंसः ॥ ४८ ॥

आहूयन्तामाप्तराजन्यवर्गाः संनाह्यन्तां सैनिकाः शौर्यधुर्याः ॥
सर्वे वाहाः साधु सज्जीक्रियन्तां शृङ्गार्यन्तामुत्कटाः सिन्धुरेन्द्राः ॥ ४९ ॥

एवं तदानीमवनीशमौलिराज्ञाप्य सर्वानपि वाहिनीशान् ।
अर्हान्नियुज्यात्मपुरावनाय जयप्रयाणाय समुद्यतोऽभूत् ॥ ५० ॥

तदनन्तरं धरणिपाकशासनो विजयानुकूलशुभवेषभासुरः ।
समयार्हनैकविधदानसंततिप्रतिपादितावनिसुरप्रमोदनः ॥ ५१ ॥

कवचशरशरासखड्गरम्यं रघुतिलकं निजरक्षणैकतानम् ।
अधिहृदयमनुस्मरन्प्रमोदादतनुत भूपतिरानतीरतीव ॥ ५२ ॥

अथ निश्चलाक्षिजलजावलोकनैररविन्दबान्धवमतीव भावयन् ।
जपमातनोज्जनकजापतीरितं जयकारणं स जगतीपुरंदरः ॥ ५३ ॥

विजयोत्सवसूचके पुरस्ताद्विनतायास्तनये वियत्प्रदेशे ।
निरगान्निजमन्दिराद्द्विजेन्द्रैर्विहितस्वस्त्ययनो विशामधीशः ॥ ५४ ॥

निराकृतास्तस्य जयप्रयाणतो निरोधकाः संप्रति नः खला इति ।
दृढाट्टहासैरिव दिग्भिराहितैर्व्यजृम्भि भेरीनिनदैर्विशां विभोः ॥ ५५ ॥

भयावहे पटहरवप्रतिस्वने महीभुजो महिधरकंदरान्तरे ।
समागतः सविधमसाविति द्रुतं पलायिताः परमभवन्विरोधिनः ॥ ५६ ॥

मणिवेत्रलता महीवलारेः सविधे पार्श्वचरैः प्रचाल्यमानाः ।
अलसंश्चपला इवावनम्रेष्ववलोकामृतवर्षकारणानि ॥ ५७ ॥

पार्श्वद्वये भार्मणखेटपङ्क्तिर्महीपतेर्बाहुमहोनुसृत्यै ।
अभात्प्रपन्ना विनतावनीशमहःपृथङ्मण्डलरेखिकेव ॥ ५८ ॥

भुजापदानं पुरतो वलद्भुजे स्तुवत्युदारं स्तुतिपाठकव्रजे ।
इभेन्द्रमारुक्षदिलातलाधिपः पुरंदरः पूर्वदिशागजं यथा ॥ ५९ ॥

तव सैन्यरजो धरावलारे विमतं मे नयते विवृद्धिमत्ताम् ।
इति जल्पितुमिन्दुरातपत्रच्छलतोऽसेवत सार्वभौममेनम् ॥ ६० ॥

अस्यामुर्व्यामावयोर्नोपमेति प्रायो दानक्षात्रकीर्त्ती प्रगल्भे ।
पार्श्वद्वन्द्वे भूमिपालस्य नृत्तं व्यातन्वातां चामरद्वन्द्वदम्भात् ॥ ६१ ॥

किरीटपालीपरिकीलिताञ्जलीञ्जनाधिनाथाञ्जगतीपुरंदरः ।
अवेक्षणाभाषणमन्दहासतो वहूकरोति स्म विमृश्य पार्श्वयोः ॥ ६२ ॥

सततमात्मधृतं जगतीभरं वहति नित्यमसौ वसुधेश्वरः ।
इति विचिन्त्य किमेनमिभच्छलात्समभजत्कुलभूधरसंततिः ॥ ६३ ॥

अस्मद्गते रोधकमम्बुराशिं बध्नाति यावत्प्रभुरेष शक्त्या ।
इति प्रमोदादिव वेगदस्रैरवल्गि वाहैर्मुहुरेतदग्रे ॥ ६४ ॥

भारं मदीयं खलपार्थिवौघं हरिष्यतेऽसौ विभुरित्यनन्ता ।
अधान्मुदा तद्भटहस्तक्लृप्तप्रासापदेशात्पुलकप्ररोहान् ॥ ६५ ॥

अथाधिकारेष्ववनीबिडौजसः समायुताः केचन चातुरीयुताः ।
प्रयाणयोग्या बहुवस्तुसंततीरवाहयन्भारमुखैरनोमुखैः ॥ ६६ ॥

पटमण्डपान्बहुविधान्मनोहरान्कनकप्रकल्पितकटाहकर्करीः ।
मणिकम्बलास्तरणरत्नमञ्चिका दधतोऽन्वयुस्तमितरे धराधिपम् ॥ ६७ ॥

परिक्लृप्तगुणप्रगल्भबन्धाः परितो जातुषमुद्रणां प्रपन्नाः ।
धनभूषणपेटिका दधाना धरणीशं कतिचित्तमन्वगच्छन् ॥ ६८ ॥

बहुविधानि मणीमयभाजनान्यतिमनोहरहाटकपीठिकाः ।
महितशाटकपेटकमण्डलीरपि परे दधतो नृपमन्वयुः ॥ ६९ ॥

प्रगल्भलामज्जककायमानप्रकल्पनासाधनभारवाहाः ।
पुरोऽगमन्भूपमणेर्नवोपकार्यामनोज्ञीकरणाय केचित् ॥ ७० ॥

बहुविधापणिकप्रमदाजना विटवशीकरणोचितविभ्रमाः ।
चतुरगायनचारणमण्डलान्यपि विभोर्ध्वजिनीमभितोऽन्वयुः ॥ ७१ ॥

अवलोकयन्नमितवस्तुसंभृताः पथि कल्पिता बहुविधोपकारिकाः ।
अधिसह्यजातटमतीव पावनीमथ कुम्भघोणनगरीमगान्नृपः ॥ ७२ ॥

तत्र हेममयदेवतागृहप्रौढगोपुरपताकिकानिलः ।
सान्द्रकेलिवनपुष्पसौरभैः सैन्यजं श्रममपाकरोत्तदा ॥ ७३ ॥

तपनद्युतिरोधकैर्दलौघैः प्रतिवीथिप्रथमानकेरपङ्क्त्या ।
उदपादि तदन्तरुर्वरायाः कमितुर्नूतनकायमानरेखा ॥ ७४ ॥

स्नात्वा धृतालंकरणः स तस्यामानभ्य देवानधिवासपूर्वम् ।
महान्ति दानानि महीसुरेभ्यः कल्पोक्तमार्गात्क्रमशो व्यतारीत् ॥ ७५॥

अथ तत्र विनम्य देवतौघं प्रबलेनाप्तजनेन सेव्यमानः ।
शकुनैः शुभसूचकैः सहर्षं निरगान्निश्चितदिग्जयो नृपालः ॥ ७६ ॥

परितो बलरेणुभिः प्रगल्भैः परिखां शात्रवपत्तनस्य सिन्धुम् ।
अवनीपतिराविलां वितन्वन्नपरं तीरमगादगेन्द्रधैर्यः ॥ ७७ ॥

अवार्यशौर्यादवनीवलारेः शूरोऽपि भीतो हृदि चोलगोऽस्मात् ।
अयाचतासैरथ कृष्णभूपं बलैः समेतं प्रधने सहायम् ॥ ७८ ॥

तदाब्रुवन्कृष्णधराधिनेतुर्मनीषिणो मन्त्रिजना विनीताः ।
विशां पतेऽस्मद्विदितं तवाद्य विज्ञापयामः सविमर्शमेव ॥ ७९ ॥

बलवत्परिपन्थिभिर्गृहीतो बहुधा त्वं परिमोचितोऽसि तेन ।
प्रभुणा रघुनाथपार्थिवेन प्रधनं भूमिपते न ते प्रशस्तम् ॥ ८० ॥

एवं तदानीं हितवादिनस्तानिरस्य भूपो निजमन्त्रिवृद्धान् ।
प्रचोदितो दुर्विधिना बलौघैरुपागमत्तन्नगरोपकण्ठम् ॥ ८१ ॥

गम्भीराम्भोराशिखेयां पुरीं स्वामन्यासाध्यामश्रियन्वैस्तदात्वे ।
संतन्वानश्चोलगः साह्यलाभादुद्वृत्तोऽभूदुद्धतैर्योधनाथैः ॥ ८२ ॥

मध्येसमुद्रमतिमानुषविक्रमं तमालोच्य भूपतिरुपायशतैरसाध्यम् ।
प्राग्जन्मदाशरथिरेष बलानि दृष्ट्वा बन्द्धुं न्ययुङ्क्त सहसा पतिमापगानाम् ॥ ८३ ॥

निदेशतो नृपतिलकस्य तत्क्षणादगादिभिः सरभसमस्य सैनिकाः ।
विलोककाखिलजनविस्मयावहं पयोनिधावकृषत सेतुबन्धनम् ॥ ८४ ॥

सिन्धौ प्रवृत्ते सति सेतुबन्धे तदाप्यनम्रं तमतीव गर्वात् ।
विपक्षमालोक्य विशामधीशो विशिष्य रोषारुणवीक्षणोऽभूत् ॥ ८५ ॥

अथावनीपतिरधिरुह्य वारणं विलङ्घ्य तं सलिलनिधिं विरोधिनः ।
पुरीं रयादधिगतवीरपुंगवां न्यरुन्द्ध तां निरुपमविक्रमक्रमः ॥ ८६ ॥

वरणाग्रचरा विरोधिवीरा विनदन्तो युधि नीरदा इवोच्चैः ।
ववृषुर्नरपालवाहिनीषु प्रथमं व्याकुलमेव बाणवर्षम् ॥ ८७ ॥

फलकान्तरिताः परानवेक्ष्या भ्रमिभिश्चित्रगतैर्नृपालयोधाः ।
अगमन्वरणान्तिकं स्वनेतुर्बिरुदं भीषणनिःस्वनं भणन्तः ॥ ८८ ॥

कोपाटोपात्कूणितापाङ्गकोणा लक्ष्यालक्ष्यं लक्ष्यमग्रे समीक्ष्य ।
प्राकारस्थाः प्रामुचन्नग्नियन्त्राण्याशाभोगे धूममापूरयन्तः ॥ ८९ ॥

प्राकारचारिभटमुक्तशिलाकलापवृष्ट्या स धूमविसरो वियति व्यलोकि ।
पाषाणवर्षपरिपूरितदिग्विभागा कल्पान्तदुःसहघनाघनमण्डलीव ॥ ९० ॥

अथाविशद्विभुरतिरोषभीषणश्चमूं निजां वरणसमीपचारिणीम् ।
पुरः स्थितं विकलयितुं पुरं रयाद्विरोधिनो विविधबलैरधिष्ठितान् ॥ ९१ ॥

निश्रेणिकाभिर्नृपसैन्यसंघे प्राकारमाक्रामति तद्भटौघः ।
प्रणामपूर्वं प्रणिगद्य सान्त्वमदुद्रुवत्तूर्णमपास्तशस्त्रः ॥ ९२ ॥

अत्याहिताद्गलितवस्त्रमपास्तशस्त्रमालोक्य सैन्यमभितः परिधावमानम् ।
शोकाकुलं सपदि चोलगमेक्ष्य शोच्यं कारुण्यमाविरभवत्कमितुर्धरायाः ॥ ९३ ॥

कान्तायुक्तः कृतपादप्रणामो मा हन्तव्यो मां शरण्यं प्रपन्नः ।
एवं भृत्यानीरयन्भूमिपालो जीवग्राहं तूर्णमग्राहयत्तम् ॥ ९४ ॥

मणीविभूषा महिला मनोज्ञा धनाधिवासा वहवस्तदीयाः ।
वशेऽभवन्भूवलशासनस्य संप्रापिता भृत्यगणेन सद्यः ॥ ९५ ॥

अरिवशं गतवत्यथ चोलगे गलितधीरथ कृष्णपनायकः ।
अधिकभीरधिरुह्य हयोरसं पवनवेगमतीव पलायितः ॥ ९६ ॥

अथ तं रघुनाथभूवलारिं समरे चोलगनाशितारमेत्य ।
बहुधा वसुधाधुधाः प्रमोदाद्विबुधा राममिवास्तुवञ्जयाढ्यम् ॥ ९७ ॥

पारेपरार्धं क्षितिपाकशासनाः प्रौढा रणे येन पुरा पराजिताः ।
सद्यः स एवावनिपाल चोलगो बन्दीकृतस्त्वत्सविधे पदातिना ॥ ९८ ॥

सिन्धौ कृत्वा दुष्करं सेतुबन्धं जित्वा शत्रुं सत्वरं श्रीसमेतम् ।
रामं साक्षादीश्वरं क्ष्माधुरीणं जानीमस्त्वां सांप्रतं भूमिजाने ॥ ९९ ॥

आचन्द्रतारार्कममूं प्रमोदाद्वसुंधरां पालय वार्धिकाञ्चीम् ।
जयारिसंघाज्जगतीसुधांशो दयानिधेर्दाशरथेः प्रसादात् ॥ १०० ॥



Office of the
Director of Archaeology
Madras

करुणा तव चोलगे न कार्या नृप कारानिलये निधेहि शीघ्रम् ।
इति विप्रवरैरुदीरितस्तं धरणीपालमणिस्तथा व्यतानीत् ॥ १०१ ॥

आचक्रवालवसुधावसथैर्नृपालैरत्यद्भुतेदृशपराक्रमतोऽतिहृष्टैः ।
प्रस्तूयमाननिजबाहुमहास्तदानीमानन्दसान्द्रहृदयोऽजनि भूमिपालः ॥ १०२ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकलिपतचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये अष्टमः सर्गः

---

## नवमः सर्गः

अथाखिलाशाविजयोत्सुकाय महीभुजे चोलगमानहर्त्रे ।
नेपालभूपो निजकार्यभागं व्यजिज्ञपन्मन्त्रियुतो विनीत्या ॥ १ ॥

तदा प्रतिज्ञाय तथेति तस्मै विपक्षभेदं स विशामधीशः ।
आशामगस्त्याध्युषितां विजेतुं न्ययुङ्क्त तूर्णं निखिलं बलौघम् ॥ २ ॥

वेलापथे तस्य विभोर्गजानां कर्णानिलैः कैतकगर्भरेणुः ।
प्रसारितस्तत्र पयःपयोधिमकल्पयत्तं लवणाम्बुराशिम् ॥ ३ ॥

वीचीसमीरेण मुहुर्विलोलैस्तटाग्रतालीदलतालवृन्तैः ।
अग्रेसरा भूपवरा इवास्य सेवामकार्षीत्पथि सिन्धुराजः ॥ ४ ॥

हंसावलिः सैन्यजनारवेण वेलावनान्ताद्वियदुत्पतन्ती ।
महीभुजश्चामरमण्डलीनामाम्रेडितामातनुते स्म शोभाम् ॥ ५ ॥

आक्रम्य मामास्थितमद्य दुष्प्रमसावजैषीदिति हर्षमाणः ।
प्राशंसदेनं पतिरापगानां विरावदम्भोच्चलवीचिहस्तम् ॥ ६ ॥

चक्रस्तने सह्यतनूभवाया व्यापारयन्तं चलवीचिहस्तैः ।
आलोक्य हर्षादवनीसुधांशुरमंस्त शृङ्गारिणमब्धिराजम् ॥ ७ ॥

भूपाग्रणीर्भूमिसुताधिनाथपादाब्जविन्यासपवित्रपांसुम् ।
अगात्तटाभ्यर्णमथाम्बुराशेः प्रत्युद्गतो वीचिपरम्पराभिः ॥ ८ ॥

अगाधतामम्बुनिधेरमेयां विमृश्य तत्पूरविशोषयित्रे ।
बाणाय रामस्य परं नमस्यामकल्पयद्भूपतिरन्तरङ्गे ॥ ९ ॥

विच्छिद्य सेतुं विशिखासनेन परैरगम्यं पयसां निधानम् ।
चकार रामः स पुरेति सिन्धुबन्धुं विभुर्नोत्सहते स्म बन्द्धुम् ॥ १० ॥

सन्तो विनिन्दन्ति समुद्रयानमिति क्षितीशो हृदये विचार्य ।
नेपालभूपाहितनिग्रहार्थमैच्छत्तदा प्रेषितुमात्मसैन्यम् ॥ ११ ॥

विना विलम्बं विमताञ्जिगीषुर्महीपतिस्तत्र महाम्बुराशौ ।
तरीभिरेवोत्तरणाय तूर्णमकल्पयत्सेतुमनन्यसाध्यम् ॥ १२

नियोजितास्तेन नृपालकेन यूथाधिनाथा रणयोग्यवेषाः ।
तरीपथेनैव तदन्तरीपमगुर्विपक्षाद्भुतशौर्यधैर्याः ॥ १३ ॥

आरभ्य वेलामभितोऽम्बुराशिमनीकिनीं सत्वरमापतन्तीम् ।
आलोक्य तामाहवकौतुकोत्कैरभावि नेपालनृपारिवर्गैः ॥ १४ ॥

सा वाहिनी सिन्धुपतिं समन्तादापादयन्ती भृशमुत्तरङ्गम् ।
तरङ्गरेखान्तरिता तरीभिस्तदन्तरीपं तरसा न्यरौत्सीत् ॥ १५ ॥

गाम्भीर्यमुद्राग्रहणे पयोधेर्गृहीतवन्तः किमु कूर्मवीरान् ।
भटा महीपालमणेः प्रगल्भा बाहाग्रवल्गत्फलकालिदम्भात् ॥ १६ ॥

भटा महीन्दोः पटवस्तदानीं पातुं पयः संचरतां पयोधौ ।
अम्भोधराणामशनिप्रहारमकल्पयन्मेदुरमग्नियन्त्रैः ॥ १७ ॥

अयोमयीभिर्नलकावलीभिरपाङ्गकोणैरपि रोषशोणैः ।
अवाकिरन्नग्निकणान्विपक्षभूपालसैन्येषु पुरःस्थितेषु ॥ १८ ॥

परङ्गियोधप्रहितैः क्षुरप्रैर्विभोरभूत्रैव चमूर्विहस्ता ।
परागजातं किमु पद्मजातं प्रगल्भते शोषविधौ पयोधेः ॥ १९ ॥

विलम्बनं नैव विधेयमद्य विपक्षविद्रावविधाविर्तीव ।
प्रभोर्भटैः प्रस्तुतकार्यहेतोरकारि सर्वैः परमैकमत्यम् ॥ २० ॥

उदस्तनानायुधमुत्पताकमभिद्रवन्तीमवनीशसेनाम् ।
आलोकितुं स्थातुमशक्नुवन्तो भयात्पलायन्त परङ्गिवंश्याः ॥ २१ ॥

धनानि दारैः सममर्जितानि शस्त्राणि शौर्येण समं धृतानि ।
विहाय सर्वे भयविह्वलास्ते निधौ जलानां न्यपतन्सवेगम् ॥ २२ ॥

विधाय विद्वेषिवधं स्वयोधैर्विभीषणं राम इवात्मभक्तम् ।
नेपालभूपं रघुनाथनेता तदास्पदे तत्र समभ्यषिञ्चत् ॥ २३ ॥

अथावनीवासवमभ्युपेत्य चाराः प्रकृप्ताखिलदिक्प्रचाराः ।
व्यजिज्ञपन्कार्यविदो विरोधिप्रवर्तितं वृत्तमिति प्रतीच्याम् ॥ २४ ॥

सिंहासनद्रोहविधानशीला जिघांसवस्तं क्षितिपालबालम् ।
तुण्डीरपाण्डयादिमदुष्टभूपैर्विचारयन्ते विपदं जगत्याः ॥ २५ ॥

पाश्चात्यभूमीपतयो व्यतन्वन्सद्यात्मजायाः सहसा विभङ्गम् ।
विचारहीना निजवाहिनीनां भविष्यदत्यद्भुतभङ्गहेतौ ॥ २६ ॥

इतीरितं चारमुखैरिलाया नेता स वृत्तं निखिलं निशम्य ।
बलं रयात्पश्चिमदिग्जयाय न्ययूयुजन्निस्तुलबाहुशौर्यैः ॥ २७ ॥

अदभ्रवीचीभ्रमदभ्रकल्पगन्धर्वरेखान्वितगन्धनागः ।
महारवस्तस्य महीसुधांशोश्चमूसमुद्रः समजृम्भताग्रे ॥ २८ ॥

आत्मीयसैन्याहृतचन्दनौघं पाटीरशैलं यशसा प्रसाद्य ।
अथ प्रतीच्यामरिराजधानीं तोबूरभिख्यामगमत्स तूर्णम् ॥ २९ ॥

सेनानिवेशेष्वनुसेवमानान्नियुज्य भूमीरमणो नृपालान् ।
प्रागेव भृत्यैः परिक्लृप्तमाराद्गात्पटागारमतिप्रगल्भम् ॥ ३० ॥

दिवानिशं रक्षणदीव्यदुग्रभटारवापूरितपार्श्वभागम् ।
प्राकारचक्रप्रतिमानशिल्पपटावृति प्राचितकण्टकौघम् ॥ ३१ ॥

सद्यःसमुत्पादितसैकताङ्कवितर्दिकाप्राङ्गणवीक्षणीयम् ।
आस्थानसीमादिनृपाधिवासनिवेशविन्यासनितान्तरम्यम् ॥ ३२ ॥

विशाललामज्जककायमानविनिःसरत्सौरभलोभनीयम् ।
अन्तर्गृहाभ्यन्तरराजमानसौवर्णमञ्चावलिसंविधानम् ॥ ३३ ॥

उर्वीपतिस्तत्र पटोपकार्यां प्रशस्तवस्तुप्रकराभिरामाम् ।
आत्मीयहैमावसथाविशेषमध्यास्त भोगाधरितामरेन्द्रः ॥ ३४ ॥

नृपाधिकारिप्रकरैर्नियुक्ता वणिग्जना निस्तुलवस्तुयोग्यम् ।
पटीकुटीरप्रकरैः समन्तात्प्राकल्पयन्नापणसंविभागम् ॥ ३५ ॥

पटीनिवासारचनप्रक्लृप्तः शङ्कुप्रहारो हृदि शत्रुजातैः ।
अशङ्कि निःशङ्कतयात्मनाथवाहान्तरक्षिप्त इव प्रकामम् ॥ ३६ ॥

योधौ स्थलाकान्तिविधौ युयुत्सू निवारितौ स्वस्वजनैर्निकामम् ।
भविष्यति प्रौढरणे परेषां भङ्गं पुरस्तात्छपथैः प्रकल्प्य ॥ ३७ ॥

आक्रम्य सेनाभिगमात्पुरैव स्थलं समीकृत्य जनं स्वकीयम् ।
अन्वेषितुं दूरगतोऽथ कश्चिदाक्रान्तमन्यैस्तदयत्नसिद्धम् ॥ ३८ ॥

उत्प्लुत्य भीत्या द्रुतमुष्ट्रसंघाद्भद्रे निजं भारमपास्य याते ।
अहासि लोकैः कृतहस्ततालं वणिग्जनस्तत्पुरभारवाही ॥ ३९ ॥

दृष्ट्वा विपण्यां द्विपदुष्टचेष्टाः स्वाभाविकीर्यन्तृकृताः समीक्ष्य ।
पर्याकुलैर्भारवहैरनिन्दि साधु ब्रुवन्नप्यखिलैर्निषादी ॥ ४० ॥

करेणुमारूढवतीं कृशाङ्गीं समीक्षमाणे सति सामजस्थे ।
करेणुमालोकयते करीति सभ्रूविलासं चतुरैरहासि ॥ ४१ ॥

पण्याय मूल्यं द्विगुणं प्रदातुं विटस्य वाञ्छां हृदि वैश्यकान्ता ।
संजानती प्राणसखेऽन्तिकस्थेऽप्यङ्गीकरोति स्म शनैरपाङ्गैः ॥ ४२ ॥

स्थले विशाले सति निर्महीजे म्लाना जनास्तत्र महातपेन ।
छायां तदा भूरुहसंततीनामध्यासतातर्कितवर्णभेदम् ॥ ४३ ॥

तडागतीराणि तरूपकण्ठानध्यासितानग्रसरैरवेक्ष्य ।
अग्रेसरानप्यवकाशहीनान्भृत्याननिन्दन्प्रभवः स्वकीयान् ॥ ४४ ॥

अनोकहानामहरन्त तूर्णं भूपालयोधाः फलपुष्पवृद्धिम् ।
आसन्नविद्वेषिधराधिपानाममेयसंपत्तिमिवात्मशक्त्या ॥ ४५ ॥

प्रगल्भसंग्रामविधिप्रतीतैस्तौरङ्गिकैर्हस्तिपकैस्तदानीम् ।
अहारि शाल्यावलिरन्तिकस्था वेणीलतेवाहितवीरलक्ष्म्याः ॥ ४६ ॥

कुटीरनिर्माणकृते भटौघाः शाखास्तरूणां सहसा विलूय ।
उपाहरन्नान्तरतापमाराच्छायाजुषो रोषवतो जनस्य ॥ ४७ ॥

समूलघातं हतवद्भिरुर्वीजातावलिं सैन्यचरैरभावि ।
एतां दशामेतदरातिसंघं नेष्याम इत्येव निदर्शयद्भिः ॥ ४८ ॥

बहुप्रदे पार्थिवलोकचन्द्रे भटास्तदीयाः परिपूर्णकामाः ।
भूषापटीचन्दनभोजनाद्यैरध्वश्रमं नागणयन्नदन्तः ॥ ४९ ॥

परेद्यवि प्रौढरणः परैर्नो भविष्यतीति प्रतियूथनाथम् ।
न्यवेदयन्वेत्रधरा निशायां निदेशतस्तत्र नृपालमौलेः ॥ ५० ॥

धराधिपो धर्मरणः प्रतीतः पलायतेति प्रतिपक्षभूपान् ।
आवेदयच्चारमुखैर्निजातैरात्मीयशौर्यानुगुणं विधेयम् ॥ ५१ ॥

अथ प्रभाते स विशामधीशः कृताह्निकः कृत्यविदाद्वयाय ।
निषेव्य रामं निरगात्सहर्षं प्रसादमासाद्य पयोजबन्धोः ॥ ५२ ॥

गम्भीरभेरीरवगर्भितेन व्यभाथि सद्यो वियतस्तलेन ।
प्रौढः श्रुतेषु प्रतिपाद्यमानं संसूचयित्रेव गुणं स्वकीयम् ॥ ५३ ॥

आकर्ण्यतेऽस्यैव भुजापदानमन्यत्र किंचिद्वसुधातलेऽस्मिन् ।
एवं निरस्ताखिलशब्दमेव न्यगादि भेरीनिनदैस्तदानीम् ॥ ५४ ॥

समं प्रवृत्तानि नृपालसैन्ये भेरीनिनादैः करिबृंहितानि ।
तदा व्यजृम्भन्त धराधरेन्द्रप्रतिस्वनाः प्रौढतमा इवोच्चैः ॥ ५५ ॥

सैन्यं रविर्मज्जनकं स्वकीयैर्मरीचिभिर्ना कुरुतां सतापम् ।
एवं विचिन्त्येव चमूसमुत्थः पर्यावृणोति स्म रविं परागः ॥ ५६ ॥

उदस्तहस्तादुदितो न चेत्स्याद्भद्रेभपङ्क्तेर्वमथुप्रपञ्चः ।
नामावशेषा दिवि नाकलोकतरङ्गिणी तद्बलरेणुभिः स्यात् ॥ ५७ ॥

चमूपरागो जननायकस्य वितायमानो वियति व्यलोकि ।
भटाहवप्रौढिमदर्शनेच्छोः पालीव कृता पटमण्डपानाम् ॥ ५८ ॥

वाहाः प्रगल्भा नियतं महीन्दोर्वलाहकाः केतनवातनुन्नाः ।
न चेत्कथं तीव्रतरं नदन्तो धारासमेता धरणौ भवेयुः ॥ ५९ ॥

खुराहतैर्घोटकमण्डलीनां समुद्भवाः शर्करिलस्थलीषु ।
कृशानुकीला व्यलसन्क्षितीन्दोस्तेजःप्ररोहा इव दीप्यमानाः ॥ ६० ॥

कशा धृताः सादिकरैः परेषां प्रहारहेतोरिति भावि कार्यम् ।
हेषारवैरेव तदाभ्यवोचन्वाहा रयन्यक्कृतगन्धवाहाः ॥ ६१ ॥

व्यधुः पुरा सह्यसुताविभङ्गं ये भूमिपास्तानिह पातयामः ।
एवं सजातीयतया धरेन्द्राश्चमूद्विपेन्द्रच्छलतोऽन्वगच्छन् ॥ ६२ ॥

उदस्तहस्तं स्फुटमुन्नदन्ती कुलाधिनेत्रे हरिकुञ्जराय ।
आवेदयन्तीव गजालिराभादालीयसंग्राममतिप्रगल्भम् ॥ ६३ ॥

सैनागजेन्द्रा जननायकस्य निषादिबृन्देन धृतैर्निकामम् ।
कुन्तैरलक्ष्यन्त कुलाचलेन्द्राः कूटप्ररूढैरिव वेणुकुञ्जैः ॥ ६४ ॥

पार्श्वे भटानां परिधूयमाना भृत्यैरलासीद्द्विदुरांशुकालिः ।
पलायतेति प्रतिपक्षभूपान्संसूचयन्तीव लमीकभूमौ ॥ ६५ ॥

आयोधनेष्वन्यनृपालसंघात्समाहृता कीर्त्तिरिति स्वभृत्यैः ।
संवीज्यमानं सितचामरौघं प्रादर्शयन्पार्थिवयूथनाथाः ॥ ६६ ॥

आविर्भवत्कोपकृताट्टहासव्यासक्तनानाविधवीरवादाः ।
करालवल्गत्करवालहस्ता वनायुजाश्वैर्यवना व्यराजन् ॥ ६७ ॥

आसज्ज्य मौर्वीं बहुधावकृष्टाः शरासवल्लयश्चलिता भटौघैः ।
जयश्रियः संवननैकयोग्यां सविभ्रमभ्रूसमतामगच्छन् ॥ ६८ ॥

भटावलेरायसयन्त्रभाजो वर्त्तिर्ज्वलद्वह्निकणा व्यराजत् ।
प्राणानिलग्रासपरा परेषामहीन्द्रपालीव विषाग्नियुक्ता ॥ ६९ ॥

अभिषेणनमद्भुतं रणोर्व्यां रघुनाथक्षितिपेन रच्यमानम् ।
अवलोक्य भयादनाहवोत्कैररिभिः पाण्डयनृपादिभैरभावि ॥ ७० ॥

रघुनाथविरोधिराजवर्गः सदनं स्वं समुपैष्यतीति मत्वा ।
अलभन्त नितान्तमन्तरङ्गे परमानन्दममर्त्यपक्ष्मलाक्ष्यः ॥ ७१ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकलिपतचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये नवमः सर्गः

---

# दशमः सर्गः

अभ्यायान्तीमभ्यगच्छन्महीन्द्रोः सेनां पाण्ड्यक्ष्मापसेनाथ तूर्णम् ।
पूर्वाम्भोधिं घोषसंपूरिताशं प्रौढध्वानः पश्चिमो वा पयोधिः ॥ १ ॥

अन्योन्येषामग्नियन्त्रादुदीतैर्धूमैर्योधा दुर्निरीक्षा रणोर्व्याम् ।
अघ्नन्रोषाविष्कृतात्मापदानैरन्याञ्ज्ञात्वा सैन्ययोरात्तशौर्याः ॥ २ ॥

पाण्ड्यक्षोणीपालयोधाभिक्लृप्तान्याराद्रूढान्यग्नियन्त्राण्यसंख्यम् ।
द्यामाक्रम्योद्दीप्रकीलाकलापैः सद्यःशाम्यद्दीपिकासाम्यमापुः ॥ ३ ॥

सैन्यद्वन्द्वे सैनिकैः कल्प्यमाना नासीराग्रे शातनाराचरेखाः ।
नैरन्तर्यात्पश्यतां निर्निमेषं कुन्ता हन्तुं कुञ्चिताग्रा इवाभुः ॥ ४ ॥

अस्त्रैश्छिन्नात्सद्य एवारिवर्गैर्बाहाकाण्डात्पाण्ड्ययोधावलीनाम् ।
विष्वक्कीर्णा रक्तधारा व्यतन्वन्प्रायः शौर्यद्वाहुधामप्रतीतिम् ॥ ५ ॥

धावन्खड्गी धन्विनं पातुकामो रोषावेशाद्दोषविद्धोऽर्धमार्गे ।
शीर्यत्प्राणस्तं विशीर्षं व्यतानीत्पाल्या प्राणापेक्षया हि प्रतिज्ञा ॥ ६ ॥

शूरौ कौचिद्धन्विनौ सुप्रयोगौ बाणैर्बाणान्वारयन्तौ प्रकामम् ।
नासीराग्रे यूथनाथावलीनामातन्वातामक्षिसाफल्यमारात् ॥ ७ ॥

पादातानामन्तमापादयन्तं यन्तारं द्रागीक्ष्य दन्तावलस्थम् ।
उत्प्लाव्योच्चैर्वाहमुद्यम्य कुन्तं सादी सद्यः सादयामास रोषात् ॥ ८ ॥

सैन्यद्वन्द्वे संचरन्ती विशङ्कं दन्तादन्तिव्यासजद्दन्तिपङ्क्तिः ।
गम्भीराम्भोराशिगर्भे भ्रमन्ती क्षुभ्यद्वीचि क्षोणिभृन्मण्डलीव ॥ ९ ॥

हस्तिस्तोमो निस्तुलैरग्नियन्त्रैर्व्याविद्धाङ्गो वह्निना तद्भवेन ।
आरात्सैन्यात्याहितापादकोऽभूच्छैलव्रातः संक्षतो वज्रिणेव ॥ १० ॥

दन्तस्यूतोदारबाहान्तरालो हस्तीन्द्रेण प्रोद्धृतः खड्गहस्तः ।
भ्रश्यत्प्राणः प्राजितारं जिघांसुं शीघ्रं रोषाच्छिन्नशीर्षं व्यतानीत् ॥ ११ ॥

हस्त्यारूढः सायकैर्हन्यमानोऽप्यश्वारोहैराहवाग्रेभकुम्भौ ।
आस्फाल्यायादामरीणां वधूनां वक्षोजाग्रे वर्धयन्रोमहर्षम् ॥ १२ ॥

अभ्यायान्तीमन्यराजन्यसेनां मध्येजन्यक्षोणि मत्तेभमल्लः ।
घोषोन्मेषैर्गुम्भिताशां न्यरौत्सीदद्रीन्द्रो वा वाहिनीमर्धमार्गे ॥ १३ ॥

संग्रामान्तः सादिवर्गेण कॢप्ता काम्भोजानां मण्डलाकाररेखा ।
पादातानामच्युतक्ष्मापसूनोः प्राकारोऽभूद्दुर्निरीक्ष्यो विपक्षैः ॥ १४ ॥

अन्योन्येन प्रेरितैरस्त्रजातैरत्यापन्नौ प्राजितारावभूताम् ।
युद्धक्षुभ्यद्दन्तमुद्यन्मदाम्भो दन्तिद्वन्द्वं चाप तादृक्प्रकारम् ॥ १५ ॥

खड्गाघाताद्वाहिकीलान्रथाग्रे व्यातन्वानो हस्तिमल्ले विविघ्ने ।
सांमिस्यूतं वाहसादी रथेन व्यावर्त्याश्वं विस्मयापादकोऽभूत् ॥ १६ ॥

रक्तासिक्तो राजदन्ताभिघाताञ्नागोत्क्षिप्तः कश्चिदभ्येत्य नाकम् ।
औज्झच्चित्रं सद्य एवात्मदेहं दिव्यस्त्रीभिर्दत्तहस्तावलम्बः ॥ १७ ॥

हन्तुं वीक्ष्यायान्तमश्वाधिरूढं कुण्ठित्वाश्वं शातकुन्तेन योधः ।
तस्मिन्बाणोन्मोचने दत्तदृष्टौ चक्रे खड्गाच्चापहस्तं विहस्तम् ॥ १८ ॥

धूलीपालीधूसरे युद्धरङ्गे कोपाविद्धो रोपमार्गानुरोधात् ।
कुन्ती कोपात्कोऽपि कोदण्डहस्तं वाहामध्ये पाटयामास सद्यः ॥ १९ ॥

विद्ध्वा योधो मत्तवेतण्डमल्लं कुन्तेनान्तः कुम्भभागस्य तस्मात् ।
वान्तै रक्तैरावृतोऽभाज्जयश्रीवक्षोजाङ्कैः कुङ्कुमैरङ्कितो वा ॥ २० ॥

रोषोन्मेषावेशरूक्षाक्षिकोणौ वाहौ शश्वत्सादिनौ वल्गयन्तौ ।
अन्योन्यस्मिन्दंशिताङ्गे कृपाणं संतन्वानौ व्यर्थयुद्धावभूताम् ॥ २१ ॥

आलीढस्थं चर्मसंग्राहिहस्तं व्यालीढाङ्गं सायकैर्वीतचेष्टम् ।
आशङ्क्याराच्छद्मकृत्यातिगूढं प्रायो बाणान्प्रामुचच्चापपाणिः ॥ २२ ॥

अश्वारोहा मण्डलाकारगत्या पादातानां घूर्णयामास पङ्क्तिम् ।
चक्राकारैश्चङ्क्रमैर्जृम्भमाणः शीर्णां तृण्यां मारुतो वा धरण्याम् ॥ २३ ॥

पाण्ड्यक्षोणीपालसैन्ये स्वसैन्यैर्बद्धोत्साहं प्रौढसंग्रामदक्षे ।
आलोक्याराद्च्युतक्ष्मापसूनुः कोपारक्तापाङ्गकोणोऽजनिष्ट ॥ २४ ॥

हासाङ्कूरैरुत्तमशौर्यातिरेकं व्याचक्षाणो वारवाणं दधानः ।
हस्त्यारूढश्चापहस्तस्तदानीमुर्वीनाथः संगरायोन्मुखोऽभूत् ॥ २५ ॥

अग्रे जाग्रत्यच्युतक्ष्मापसूनोः सौवर्णानां केतनानां समूहे ।
विद्युद्वल्लीविभ्रमेण भ्रमद्भिर्दूरे दूरे दुद्रुवे राजहंसैः ॥ २६ ॥

पाण्ड्यक्षोणीपालसैन्ये सदैन्यं प्रत्यावृत्ते जग्गराजः सबन्धुः ।
बद्धोत्साहः प्रत्यगात्पार्थिवेन्द्रं भास्वन्तं द्राक्पावकं वा पतङ्गः ॥ २७ ॥

अग्रे योधैरच्युतक्ष्मापसूनोः क्रोधावेशाद्गुम्भितः कुन्तजातैः ।
भ्रश्यत्प्राणो बन्धुवर्गेण साकं जन्यक्षोण्यां जग्गराजः पपात ॥ २८ ॥

रक्तासिक्ते युद्धरङ्गे सतापं लोलप्राणा भूमिपाला लुठन्तः ।
विश्लेषेण व्याकुला वीरलक्ष्म्याः प्रापुः शय्यां पालवीं वा व्यराजन् ॥ २९ ॥

शस्त्रच्छिन्नक्षात्त्रगात्रास्रपूरैः पूर्णे संग्रामाङ्गणे भूमिपालाः ।
लोलाः केचिल्लूनगात्रास्तदानीं ग्राहाः सिन्धौ क्लृप्तचारा इवासन् ॥ ३० ॥

मेदोरक्तैर्मेदुरे युद्धरङ्गे गन्तुं शक्ता नैव केचित्क्षितीशाः ।
लोलप्राणत्राणलोभाच्चलन्तः पङ्के मग्ना भद्रनागा इवासन् ॥ ३१ ॥

छिन्नं सेतुं शीर्षजालैर्नवीनं पाथःपूर्णं कण्ठरक्तैः परेषाम् ।
संतन्वानः सह्यजायास्तदानीमाभाच्छौर्यादच्युतक्ष्मापसूनुः ॥ ३२ ॥

जन्ये सैन्यैर्जग्गराजादिमेषु व्यापन्नेषु प्राप्तभीः पाण्ड्यवीरः ।
क्षोणीरक्षाक्षोभ्यबाहाबलाढ्योऽप्यात्मप्राणत्राणयत्नाकुलोऽभूत् ॥ ३३ ॥

स्कन्धावारे गन्धनागाश्वसंघान्योषारत्नद्रव्यभूषाविशेषान् ।
पाण्ड्यस्त्यक्त्वा प्राणभीत्या समित्यां दीर्घाक्रोशं प्राद्रवद्दीनदीनः ॥ ३४ ॥

तुण्डीराणामीशिता दुर्नयेन प्रापय्यैवं पाण्ड्यमत्यन्तभङ्गम् ।
सद्योऽधावत्तेन साकं रणोर्व्यामग्रे सैन्यैर्हास्यमानोऽस्तलज्जम् ॥ ३५ ॥

घोरे वीराशंसने घोषपूर्वं धैर्यं त्यक्त्वा धावतां क्ष्मापतीनाम् ।
संघैः साकं स्रस्तहस्तायुधः सन्विग्नोऽधावत्तत्र राविल्लवेङ्कः ॥ ३६ ॥

व्यर्थान्भूयो व्याहरन्वीरवादान्युद्धक्षोण्यां वीरवद्योद्धुमेत्य ।
प्रागेव द्राक्प्राद्रवत्पाण्ड्यभूपान्मध्येसैन्यं माकराजः सदैन्यम् ॥ ३७ ॥

जन्मारभ्यादृष्टसंग्रामरङ्गश्चञ्चद्गर्वो रायदलवायिचञ्चः ।
रक्तासिक्तान्राजराजीकबन्धान्दूरे दृष्ट्वादुद्रुवद्‌दूयमानः ॥ ३८ ॥

साकं युद्धे भ्रातृभिः शाकमूरुक्षोणीशेषु क्षुण्णगात्रेषु तेषु ।
शेषा भीताः शीर्णशीर्षण्यशीर्षा भ्रश्यद्भूषाः प्राद्रवन्दीनवेषाः ॥ ३९ ॥

अग्रे धावत्यात्मनाथेऽतिभीत्या युद्धक्षोण्यां यूथनाथास्तदीयाः ।
शौर्यद्वैधं छिन्नहारं रणोर्व्याः प्रौढाः सर्वे प्राद्रवन्नैकदिक्कम् ॥ ४० ॥

पाण्डयक्षोणीपालभद्रेभपङ्क्तिर्भग्नाप्याजौ बाणपातैस्तदानीम् ।
प्राणत्राणायाभवद्गर्भभाजामात्मीयानां भूमिपालावलीनाम् ॥ ४१ ॥

प्रासैर्भासो भूरिभिर्निर्मिमाणे सूर्ये जाग्रत्यच्युतक्ष्मापसूनौ ।
पाण्डयक्षोणीपालसैन्यं सदैन्यं प्रालेयस्य प्रौढिमाढौकते स्म ॥ ४२ ॥

प्राप्तां सद्योऽदर्शनं पार्थिवेन्दुर्वेलातीतां विद्विषद्भूपसेनाम् ।
कैश्चिन्मायावेदिभिः कल्प्यमानामाराद्विद्यामैन्द्रजालीममंस्त ॥ ४३ ॥

पाण्डयान्दृष्ट्वा शूरवद्धासमानान्प्रापुर्मोदं देवतापक्ष्मलाक्ष्यः ।
धैर्यं त्यक्त्वा धावमानेषु तेषु प्रायो लज्जानम्रवक्त्रा बभूवुः ॥ ४४ ॥

शेषाः केचिद्धैर्यविश्लेषदीनाः पाण्डयक्षोणीपालवर्ग्याः क्षितीशाः ।
स्थातुं यातुं नैव शक्तास्तदानीमासन्नात्मप्राणरक्षातिलोलाः ॥ ४५ ॥

प्रायस्त्यक्त्वा कञ्चुकान्प्रद्रवन्तो भूपाः केचिद्भोगसंकोचभाजः ।
वल्मीकाग्रे वासमासाद्य सद्यो भूरिश्वासा भेजिरे भोगिभूयम् ॥ ४६ ॥

जन्ये जाग्रत्यच्युतक्ष्मापसूनोः सैन्ये दैन्येनाकुलास्तूर्णमन्ये ।
पाण्डयक्षोणीपालयोधाग्रगण्याः शस्त्रैः साकं साध्वसानि व्यमुञ्चन् ॥ ४७ ॥

साह्यं कर्तुं यः समायान्नृपौघस्तस्य प्राणत्रायकं तार्णमेव ।
इत्थं दैन्यादीरयन्तोऽथ केचिद्दंष्ट्वा वक्त्रे दर्शयन्ति स्म घासान् ॥ ४८ ॥

शौर्यद्वैधाञ्शीर्णशीर्षण्यलक्ष्यानारात्पाण्डयान्संभृताकीर्तिभारान् ।
आशङ्क्याजावच्युतक्ष्मापसूनोर्योधा हन्तुं नोत्सहन्ते स्म कांश्चित् ॥ ४९ ॥

वल्मीकस्थान्वक्त्रसंदष्टघासान्दीनालापान्दीर्घदीर्घप्रणामान् ।
क्षोणीपालान्क्षोभपर्याकुलाक्षानैक्षिष्टारादच्युतक्ष्मापसूनुः ॥ ५० ॥

साकं भेरीनिस्वनैः सैन्यघोषे रोदोरन्ध्रं रुन्धति क्ष्मातलेन्द्रः ।
अग्रे गच्छन्नक्षिलक्ष्यं व्यतानीत्स्कन्धावारं पाण्डयसंपत्प्रचारम् ॥ ५१ ॥

सैन्यापेतं शत्रुसर्वस्वलक्ष्यं सीतानेतुर्बाणपातेन सद्यः ।
अम्भोहीनं मौक्तिकाद्यैः समस्तैर्वस्तुव्रातैर्वारिधिं वा समेतम् ॥ ५२ ॥

विश्वत्रय्यां विश्रुतं वस्तुजातं संघीकृत्य प्रायशः सर्वशस्त्या ।
नेत्रा वाण्या नैपुणान्निर्मनुष्यं शिल्पं साक्षात्कल्पितं वातिचित्रम् ॥ ५३ ॥

भूषापेटीशाटिकाभूरिसुख्यान्यासन्वस्तून्यच्युतक्ष्मापसूनोः ।
अग्रे कृतान्यादराद्वीरलक्ष्म्या पाणिग्राहप्रार्थनायेव तत्र ॥ ५४ ॥

संख्यातीतान्द्रव्यरत्नादिसंघान्काम्भोजाश्वान्गन्धनागान्ग्रहीतुम् ।
तत्रामोदात्तेऽपि तत्तन्ममेति व्याचक्षाणाः प्राद्रवन्वाहिनीशाः ॥ ५५ ॥

आविःशौर्यादन्यदीयाजिसेन्द्राः स्कन्धावारे वारणस्कन्धभाजः ।
अध्यारोहन्नद्रिशृङ्गान्तरस्थाः शैलानन्यान्सिंहशावा इवारात् ॥ ५६ ॥

योधास्तस्मिन्यौगपद्येन सद्यः पाथोजाक्षीः पर्यगृह्णन्परेषाम् ।
शौर्योन्मेषच्छद्मशुल्कातिवश्याल्लँक्ष्यान्वाग्रे वीरलक्ष्मीविवर्तान् ॥ ५७ ॥

रम्यानारात्प्रौढराजोपचारप्रख्याताभिर्वस्तुपारंपरीभिः ।
प्राप्यावासान्पाण्डयवर्गेण मुक्तांस्तस्मिन्योधा भूमिपालास्तदासन् ॥ ५८ ॥

क्षुभ्यत्स्वान्तः क्षोणिभृच्छेखरेण स्कन्धावारः काङ्क्षितं यूथपानाम् ।
वेलातीतैर्वस्तुजातैर्व्यतारीत्पाथोधिर्वा प्रायशो निर्जराणाम् ॥ ५९ ॥

धीरोदात्तो दीनरक्षाधुरीणः सद्यो भूपः सह्यकन्यातटाग्रे ।
प्रौढां कीर्त्तिं प्राप्तुकामो व्यतानीत्पाण्डयक्षोणीपालकप्राणदानम् ॥ ६० ॥

प्रौढं पाण्ड्यक्षोणिपालं सबन्धुं बन्द्धुं पश्चाद्धावमानं बलौघम् ।
व्यावर्त्याराद्विश्वविख्यातशौर्यस्तत्रावात्सीद्भूमिपालस्तदानीम् ॥ ६१ ॥

अथ सह्यसुतातटाग्रभूमावुदयत्कीर्त्तिलताततेरुपघ्नम् ।
न्यदधादरिवीरनिग्रहीता विजयस्तम्भचयं विशामधीशः ॥ ६२ ॥

अदृष्टपूर्वाहवहर्षमाणैः प्रौढैः क्षितीशैः प्रतिपाद्यमानम् ।
पाण्डयेशसङ्ग्राङ्गहतिप्रपञ्चमाकर्णयन्तं विनयातिरेकात् ॥ ६३ ॥

भद्रासनस्थं भुवनप्रतीतभुजप्रतापं रघुनाथभूपम् ।
अन्याहृतैरश्वगजादिवस्तुजातैरसेवन्त भटाः समस्ताः ॥ ६४ ॥

नारीजनं च मदनागघटाश्च वाहान्भूपालयोग्यमणिभूषणरत्नपेटीः ।
पश्येति वेत्रधरभाषणतो विलोक्य प्रादान्महीन्दुरथ तद्भटशेखरेभ्यः ॥ ६५ ॥

तुण्डीरेभ्यो दुष्टराजालयेभ्यश्चाराः केचिद्दृष्टकार्यप्रचाराः ।
अभ्यागच्छन्नच्युतक्ष्मापसूनोरास्थानीं तामक्षिसाफल्यदात्रीम् ॥ ६६ ॥

मुखान्तिकप्रणिहितहस्तमुद्रणाश्चरास्तदा विनयनताः ससंभ्रमम् ।
समासदन्सविधममुष्य भूपतेर्विशेषतो निजविदितं विवक्षवः ॥ ६७ ॥

भटैः पुरा तव समरे पराजितस्त्रपां विना धरणिधवैः स्वसंनिभैः ।
विचारयत्यधिपमणेर्विरोधितां स कृष्णभूपतिरतिसत्त्ववानिव ॥ ६८ ॥

तं निग्रहीतुं तरसा बलौघं संप्रेषयाद्यैव जनाधिपेति ।
वदत्सु चारेषु तथा विधातुं न्ययुङ्क्त भूपान्निजवाहिनीशान् ॥ ६९ ॥

अवनीपतिराशये विधेयं सकलं हस्तगतं विचार्य सम्यक् ।
अथ पञ्चनदं शनैरयासीत्तटमार्गेण मरुद्वृधातटिन्याः ॥ ७० ॥

मरुद्वृधाया मरुता महीन्दुरपाकृताध्वश्रममात्मसैन्यम् ।
न्यवीविशत्तत्र निजोपकार्याप्रान्तेषु केलीवनभासुरेषु ॥ ७१ ॥

मणिगोपुरमण्डपस्थलान्तर्वसतेर्विस्मृतरूप्यशैलवासम् ।
निजनिर्मितनित्यपूजनाढ्यं प्रभुरासेवत तत्र भालनेत्रम् ॥ ७२ ॥

अधिवसन्नथ तत्र सभान्तरं समुपगम्य समाचरितानतीन् ।
उपगतोत्तरदिग्विजयोत्सवान्प्रभुरलोकत यूथपतीन्निजान् ॥ ७३ ॥

अधिपतिमवदन्नथागतास्ते विमतधराधरवीररक्षितानि ।
भुवनगिरिमुखानि भूप दुर्गाण्यहृषत सत्वरमस्मदीययोधैः ॥ ७४ ॥

अथ कृष्णजनाधिपः समेतो यतिराजप्रमुखैरतीव यत्नात् ।
समराय समागतोऽस्मदीयैर्भटवर्यैर्विधुतः पलायितोऽभूत् ॥ ७५ ॥

एवंवादिषु भूतनाथविसरेष्विन्धानबाहामहा
भूपाद्यै रघुनाथभूपतिलकः संभाव्य तान्सादरम् ।
प्रौढक्ष्मापकुलावतंसविलसत्पार्श्वद्वयीको बलै-
रानन्दातिशयाद्ययान्निजपुरीं तन्नाभिधानां तदा ॥ ७६ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकलिपतचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यसंद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये दशमः सर्गः

# एकादशः सर्गः

अथागते दिग्विजयातिभास्वरे महीश्वरे मन्त्रिजनैर्महाशयैः ।
अकारि तत्रापुरमात्तकौतुकप्रवर्तिताकल्पविशेषभासुरम् ॥ १ ॥

प्रगल्भमेरुप्रकराग्रकेतनप्रकूलमन्दानिलबालचङ्क्रमम् ।
प्रशस्तमुक्ताफलरत्नपालिकाप्रपश्चितारात्रिकपात्रिकाश्चितम् ॥ २ ॥

अवेलकालागरुधूपवारिदप्रवृत्तनाट्यक्रमसौधबर्हिणम् ।
निकेतनद्वारनियन्त्रितांशुमत्फलावलीपल्लवतोरणाश्चितम् ॥ ३ ॥

मदेभमारुह्य महीशमन्मथे विगाहमाने सति राजवीथिकाम् ।
तदा तदालोकनकेलितत्परैरभावि सौधेष्वबलाकदम्बकैः ॥ ४ ॥

विलोकितुं तं त्वरया विलासिना परा करे कुङ्कुमपूर्णभाजनम् ।
दधत्युपेत्यैव तदा व्यभाद्विभोर्निवेदयन्तीव निजानुरागिताम् ॥ ५ ॥

तदापतन्त्यास्त्वरया तमीक्षितुं गलन्ति कस्याश्चिदतीव कैशिकात् ।
सुमान्यलक्ष्यन्त सुमास्त्रसत्वरप्रयुक्तनाराचपरम्परा इव ॥ ६ ॥

नितम्बिनी राजमणिं निरीक्षितुं महोद्यमा मामवमत्य धावति ।
इतीव कस्याश्चिदतीव विश्लथो मणीगणोऽभूत्कुचहारमध्यगः ॥ ७ ॥

मृगेक्षणान्या मणिदाममेखले शये वहन्ती व्यरुचत्ससंभ्रमम् ।
अनर्पयन्तीव गतावरोधिने कुचद्वयश्रोणितटाय कोपतः ॥ ८ ॥

प्रसूनशय्यापरिवृत्तिसंसजत्सुमा व्रजन्ती सुदती परा व्यभात् ।
निवेदयन्तीव नृपाय सत्वरं मनोजबाणान्निजमर्मकीलितान् ॥ ९ ॥

अनर्पयित्वा कुचयोरतित्वरावशाद्वहन्ती नवहारवल्लरीम् ।
व्यभाद्वरीतुं विभुमेकिका करे मधूकमालां दधतीव मानिनी ॥ १० ॥

इति प्रमोदात्तरलेक्षणाजनः समेत्य केलीमणिसौधजालकम् ।
अभाषतान्योन्यममुष्य भूपतेः कथास्तथा कर्णरसायनायिताः ॥ ११

अनन्यसाधारणमस्य भूभुजो मनोज्ञताशौर्यमहत्त्वमीड्यते ।
अमुं नृपालेष्वखिलेषु कौतुकात्स्वयं वृणोति स्म जयेन्दिरा यतः ॥ १२ ॥

धरातले ते विरुदध्वजाः श्रुता विभोरमुष्याद्य विभान्ति पार्श्वयोः ।
निवेद्यते यैर्निखिलक्ष्माजये पलायनं पाण्ड्यनृपादिभूभुजाम् ॥ १३ ॥

पुरे स्थिता दिग्विजयात्पुराधुना पदातयः पार्श्वचरा धरापतेः ।
भजन्ति सामन्तसमप्रभावतामवाप्ततत्तद्विभवा रणाङ्गणे ॥ १४ ॥

अमुष्य सौन्दर्यममुष्य धीरताममुष्य गाम्भीर्यममुष्य वैभवम् ।
अमुष्य वैदुष्यममुष्य वर्तनं फणीश्वरो वा भणितुं न हि प्रभुः ॥ १५ ॥

इति क्षितीन्दुस्तरलेक्षणाजने कथाः स्वकीयाः कथयत्यनेकशः ।
अशेषमाङ्गल्यविशेषभासुरं समासदत्सद्म निजं सकौतुकम् ॥ १६ ॥

इति स्ववृत्तं मगधाविलाधवः समीरयन्तौ चतुरं सभान्तरे ।
अनेकरत्नाभरणाम्बरादिभिः समीक्ष्य संभावयति स्म सादरम् ॥ १७ ॥

अथेन्दुसूर्यान्वयजान्महीभुजः किरीटकोटीपरिकीलिताञ्जलीन् ।
सभासदो वीक्षणहस्तसंज्ञया विशामधीशो व्यसृजद्यथोचितम् ॥ १८ ॥

प्रणम्य भूयः पदयो रघूद्वहं प्रसादमासाद्य ततः प्रसन्नधीः ।
पदापदानं निगदत्सु पार्थिवेष्वथाधिभूरच्युतरङ्गमाविशत् ॥ १९ ॥

तदन्तरे कञ्चुकितारहांक्रियाप्रकाशितात्मप्रभुताविजृम्भणः ।
अथात्मभृत्याननुयायिनो नृपान्निरीक्षणैरेव विभुर्न्यवर्तयत् ॥ २० ॥

सुगन्धिचूडार्पितसूनमालिकावलम्बिमिलिन्दारववन्दिनिस्वनः ।
विशामधीशो विजयोत्तरं ततः प्रमोदमानो भवनं समासदत् ॥ २१ ॥

महीभुजा तन्मणिजालकान्तिके सहस्रधा मूर्तिमतीव शारदा ।
अशेषविद्याविभवाभिलक्षिताः सहर्षमैक्ष्यन्त सरोजलोचनाः ॥ २२ ॥

ततः स तासां धरणीपुरंदरश्चतुर्विधोद्दामकवित्वचातुरीम् ।
अशेषभाषानुगुणप्रपञ्चितप्रबन्धसंदर्भविशेषपाटवम् ॥ २३ ॥

समप्रधानं शतलेखिनीसमप्रकॢप्तनानाविधपद्यपूरणम् ।
सलीलजाग्रद्घटिकाशतोचितक्रमाष्टभाषाकविताविजृम्भणम् ॥ २४ ॥

कविप्रणीताखिलकाव्यनाटकप्रबन्धतत्त्वप्रतिपादनक्रमम् ।
कणादशेषादिमकल्पितश्रुतप्रगल्भगूढार्थविवादपाटवम् ॥ २५ ॥

सुधारसस्यन्दिसुगीतिचातुरीप्रवीणवीणाप्रतिमानवादनम् ।
स्वरानुकूलस्वरमण्डलक्रमं स्वतानमानाञ्चितकिंनरस्वनम् ॥ २६ ॥

अनेकधा रावणहस्तपूर्वकप्रसिद्धयन्त्रस्वनरक्तिपाटवम् ।
यथाक्रमप्राञ्चितयक्षगानसत्पदाद्यपद्यद्विपदप्रपञ्चनम् ॥ २७ ॥

परीक्ष्य सम्यक्प्रतिबोध्य चाधिकं विशेषमुर्वीविभुरप्युदारधीः ।
अथाभिरम्भोजमुखीभिरासदत्स रामसौधं सहितं श्रियाद्यया ॥ २८ ॥

स तत्र नानाविधलास्यचातुरीप्रकारसंदर्शितभावविभ्रमाः ।
सरोजनेत्राः समभावयत्तदा सभावबन्धैश्चतुरं विलोकनैः ॥ २९ ॥

प्रभोः पुरस्तात्प्रसवाञ्जलिं परा समार्पयन्नास्यमुखे सविभ्रमम् ।
अनेकविद्यार्चितमात्मनायकं निवेदयन्तीव नितम्बिनीमणिः ॥ ३० ॥

अमुं नदीनाभिनयप्रपञ्चतान्निरीक्ष्य तत्कल्पितनैशवञ्चना ।
अपाङ्गपातैरपदेशगर्भितैरतर्जयत्काचिदरालकुन्तला ॥ ३१ ॥

अपाङ्गवीक्षाभिनयेन भूविभावभीष्टमाकाङ्क्षति गूढमादरात् ।
अवेक्षणैस्तद्ग्रहणापदेशतः सलीलमङ्गीकुरुते स सस्मितम् ॥ ३२ ॥

विलोकयन्ती विभुमेकिका वधूः पदार्थनानाभिनयप्रकारतः ।
अयाचतालिङ्गनमाकुलालका विनम्य मूर्ध्ना च कटाक्षविभ्रमैः ॥ ३३ ॥

समागतेऽस्मिञ्जगतीशमन्मथे तदीयसौन्दर्यतरङ्गिताशया ।
अपालपत्स्तम्भगुणं तदा परा स्थितापदेशान्नटने स्थितं तनौ ॥ ३४ ॥

पराः सलीलं प्रभुसंमुखे मुहुः समस्तदेशोचितलास्यजातिभिः ।
अतीव भूचारिभिरात्तविभ्रमाः कृतप्रपञ्चैः करणैरलासिषुः ॥ ३५ ॥

अशेषनाट्यागममर्मपारगो विलोक्य विद्याः स विशामधीश्वरः ।
प्रमोदमानः प्रतिपाद्य चाधिकं व्यभादमीभिर्विपुलेक्षणाजनैः ॥ ३६ ॥

विलासिनीलास्यविलासलालसन्मृदङ्गसंगीतनिनादमेदुरम् ।
अथेन्दिरामन्दिरमासदन्मुदा महीश्वरः संततमङ्गलास्पदम् ॥ ३७ ॥

विलासिनीकैशिकजातविभ्रमानवाप्तुमभ्येत्य तदन्तराश्रिताः ।
पयोदरेखा इव भान्ति संततं प्रगल्भकालागरुधूपपालिकाः ॥ ३८ ॥

सुमध्यमागानसुधानुषङ्गतः सजीवबन्धा इव सालभञ्जिकाः ।
वितन्वते तत्र विभोर्विलासिनीजनेन साकं परिवारचातुरीम् ॥ ३९ ॥

कुचोरुणा कुम्भकरं पराजितं मदीयविद्वेषिमदावलावलेः ।
इतीव मत्वा हृदि तत्र योषितो भजन्ति रम्भाः प्रतिहारपार्श्वगाः ॥ ४० ॥

प्रमोदतः पार्थिवभावचित्रितप्रकारलीला बहुधास्य पार्श्वयोः ।
अवेक्ष्य लज्जाञ्चितगर्भिताननाश्चरन्ति कान्ताश्चतुराः सविभ्रमम् ॥ ४१ ॥

न गर्हणीयो मम नायको विधुर्भवन्मुखैरित्यबलाः स्वसौरभैः ।
निषेवते नीलसरोरुहावली तदग्रकासारतरङ्गसंगता ॥ ४२ ॥

वितानमाल्येषु मुहुर्विसारिणीं षडङ्घ्रिरेखामपि धूपसंततिम् ।
विलोक्य तत्राब्जविलोचनास्तयोर्विदन्ति भेदं चतुरा विरावतः ॥ ४३ ॥

प्रक्लृप्तपार्श्वाङ्गणपद्मरागजप्रभाविशेषार्कमहोभरादिव ।
विकस्वरास्तत्र विभान्ति संततं प्रबद्धचामीकरपद्मतोरणाः ॥ ४४ ॥

नवाङ्गना नाथकृताङ्कनैः समं विचित्रितस्वप्रतिमाविलोकनात् ।
नमन्मुखीर्नर्मसखीजनः पुरा हसन्त्यमूर्भिन्नबहुधाभिवञ्चितः ॥ ४५ ॥

सुवर्णरम्भाफलपाटनाच्छुकास्तदन्तराले दलितात्मचञ्चवः ।
स्वभावरम्भाफलसंततौ स्पृहां वितन्वते नैव विविग्नमानसाः ॥ ४६ ॥

विसारिणीरेक्ष्य विभावरीविभोर्मयूखरेखा मणिजालकान्तरात् ।
कृतं वितानं प्रविशङ्क्य कौसुमं भजन्ति मोदं निशि तत्प्रसाधिकाः ॥ ४७ ॥

निजासु चित्रप्रतिमासु निर्मितान्विलासभावान्विविधान्समन्ततः ।
समीक्ष्य सर्वत्र समानुरागतां वधूजनास्तत्र वदन्त्यधीशितुः ॥ ४८ ॥

मृगेक्षणानां मुखसाम्यमेकदा प्रयातुकामः किमु पार्विकः शशी ।
प्रसाधनादर्शपरंपराच्छलात्समेति तत्रोज्ज्वलबिम्बसंपदम् ॥ ४९ ॥

नवद्वयद्वीपविशेषलेखनं नवं च वस्तु प्रभवे निवेदितम् ।
अवेक्ष्य हर्षादनयोरभेदतां निरूपयत्यत्र नितम्बिनीजनः ॥ ५० ॥

प्रभोरमुष्मिन्प्रथमानधैर्यतः पराजितौ रोहणमेरुपर्वतौ ।
मणीसुवर्णाचितगर्भमन्दिरच्छलाद्भजेते बहुवेषसंयुतौ ॥ ५१ ॥

अवेक्ष्य हीराचितमत्र कुट्टिमं विटङ्करत्नाम्बुजबिम्बवेष्टितम् ।
सरोधिया प्रान्तचरीः कृशोदरीर्हसन्ति कीरा मणिपञ्जराहिताः ॥ ५२ ॥

विभोर्जयाङ्कालिलिखिताग्विचक्षणा विलोक्य तस्मिन्विविधान्मृगेक्षणाः ।
अशेषभाषानुगुणं तदङ्कितान्प्रबन्धभेदान्बहुधा वितन्वते ॥ ५३ ॥

अनुव्रजन्त्यः कलहंसकारवान्मृगेक्षणास्तत्र मरालबालिकाः ।
पदे पदे तत्पदयावपङ्क्तिले मुहुर्भ्रमन्ति स्थलपद्मभोहतः ॥ ५४ ॥

विलासिनीदर्शितगूढविभ्रमे मनोरमे तत्र मनस्विनी जनः ।
सरःसमीरैरपि शारिकारवैरवैति नैव प्रणयापराधिताम् ॥ ५५ ॥

महार्हमुक्तामयहंसरूपभाग्गलन्तिकाहेमकटाहसंततिम् ।
विलासकासारविशेषकल्पनं विचिन्तयन्त्यत्र विलोककका जनाः ॥ ५६ ॥

शिखिच्छटा नाट्यकलासु शिक्षिता विलासिनीभिर्विविधास्वनेकधा ।
तदीयसेवां तनुते कृतज्ञतां विचार्य बर्हव्यजनैस्तदन्तरे ॥ ५७ ॥

तदङ्गणारामविहारतत्परा विनापि चैत्रेण वनप्रियाङ्गनाः ।
भणन्ति हर्षान्नवपञ्चमारवान्निशम्य गीतेषु नितम्बिनीततेः ॥ ५८ ॥

विचित्रपर्यङ्कविटङ्कसंगता विशेषवर्णव्यतिषङ्गभासुराः ।
तिरस्करिण्यो नवरत्नपङ्क्तयोऽप्यभेदतां यान्ति तदङ्गणान्तरे ॥ ५९ ॥

विभान्ति नानाविधरत्ननिर्मिता मनोहराः पार्श्वयुगे महीरुहाः ।
सहोदरां तत्र रमां समीक्षितुं महीं प्रपन्ना मघवद्द्रुमा इव ॥ ६० ॥

कलासु तस्मिन्सकलासु धीमतो जनाधिनेतुः समयानुवर्तिनी ।
सरस्वती नैकविधेव संततं स्फुरन्ति पार्श्वाङ्गणदन्तपुत्रिकाः ॥ ६१ ॥

मुहुर्न गर्हां तनुतां मुखाम्बुजं तवेति तस्मिंस्तरलेक्षणाततेः ।
पयोरुहं नाट्यकलासु भार्मणं प्रसूनवृष्टिं प्रथयत्यनेकधा ॥ ६२ ॥

अमूर्धचाञ्चल्यमघर्मवाःकणं तलोदरीर्गानपरास्तदन्तरे ।
प्रतिश्रुदाख्ये प्रतिमाश्च चित्रिता विलोकका नैव विवेक्तुमीशते ॥ ६३ ॥

चकोरिकास्तत्र सरोजलोचनाः स्वरत्नभूषारुचिसंचयैः सदा ।
विहारिणीः सांध्यविभा विमोहतो वितन्वते हासविधुश्रियोत्सुकाः ॥ ६४ ॥

सदेन्दिराभव्यकटाक्षशीतलं विगाहमाने सति तद्दिशां विभौ ।
तदीयसेवाविभवेषु सत्वरैरभावि हर्षादसितेक्षणाजनैः ॥ ६५ ॥

अकल्पयत्तस्य करावलम्बनं सविभ्रमं काचन सारसेक्षणा ।
अधात्पदालम्बि पटाञ्चलं विभोरमुष्य काचिद्विनतांसभासुरा ॥ ६६ ॥

अभाषतोच्चैर्मुहुरस्य पार्श्वगा पदापदानं स्तुवती वरा वधूः ।
अशंसदारादपरास्य भूभुजो भुजापदानं चतुरं वलद्भुजा ॥ ६७ ॥

असिञ्चतामोदवता हिमाम्बुना तलोदरी काचन तत्पदाम्बुजे ।
परा तदा मार्ष्टि पटाञ्चलेन ते समेत्य संभावयतः स्म सत्वरम् ॥ ६८ ॥

अवीजयत्काचिदरालकुन्तला विभोरमुष्य व्यजनं सविभ्रमम् ।
पराः प्रमोदात्प्रभवे यथोचितं महोपचारान्व्यदधुर्मृगेक्षणाः ॥ ६९ ॥

स्वभावरम्यैः सह तारकागणैः प्रकाशितः पार्विकचन्द्रमा इव ।
परीतपार्श्वः प्रभुरङ्गनाजनैरवन्दतानन्दभरादथेन्दिराम् ॥ ७० ॥

शयौ समानीय कुशेशयोपमौ प्रणम्य मूर्ध्ना वहुधा प्रमोदतः ।
मरन्दधारामधुरैर्वचोभरैरशंसदारादथ तां धराधिपः ॥ ७१ ॥

कटाक्षजाताः करुणारसोर्मयो न केवलं ते नततापहारिणः ।
प्रवर्धयन्ते फलभारसंगताः समस्तसंपल्लवलीश्च संततम् ॥ ७२ ॥

विचार्यमाणे भुवि यद्विभूतिमच्चराचरं ते दयया समेधितम् ।
अवैमि तेन त्वदपेक्षया जनैरुपास्यमन्यत्कमले किमूह्यताम् ॥ ७३ ॥

सहोदरत्वात्तव सागरात्मजे मरुद्द्रुचिन्तामणिकामधेनवः ।
वदान्यतां यन्ति वदान्यदस्ति किं त्वया समं दैवतमीप्सितार्पणे ॥ ७४ ॥

कटाक्षवीक्षा भुवि कौमुदीव ते चकास्ति सर्वत्र समं हरिप्रिये ।
तथापि ये तत्पदमाश्रयन्ति तैरलम्बि नित्यं कुमुदाकरोपमा ॥ ७५ ॥

ब्रुवन्ति ये त्वां चपलेति भूतले तदीयवाचं तनुषे त्वमन्यथा ।
यतो विधत्सेऽनिशवासमिन्दिरे मनोहरे मामकरत्नमन्दिरे ॥ ७६ ॥

इतीन्दिरां वाक्प्रसवैरिलाधिभूः समर्च्य सौवर्णसरोरुहैः समम् ।
प्रसादचिह्नानि दयाप्रकल्पितान्यवेक्ष्य संमोदमविन्दताधिकम् ॥ ७७ ॥

महीभुजस्तस्य मनोऽनुवर्तिनी सविभ्रमं वक्त्रसमर्पिताञ्जलिः ।
व्यजिज्ञपद्भोजनवैभवोचितं समेत्य काचित्समयं मृगेक्षणा ॥ ७८ ॥

प्रक्लृप्तनानाविधरत्नभाजनं सुवर्णरम्भातरुपर्णशोभितम् ।
अथाविशद्भोजनमन्दिराङ्गणं महीमहेन्द्रो महिलाभिरन्वितः ॥ ७९ ॥

निविश्य पीठे नृपतिर्मणीमये कटाक्षसंज्ञाकलनेन सादरम् ।
परार्ध्यहैमास्तरणेषु पङ्क्तिशस्ततो यथार्हं तरुणीर्न्यवीविशत् ॥ ८० ॥

अनन्यसाधारणवैभवान्वितं ततो विनीत्या धरणीपुरंदरम् ।
असेवतामुं व्यजनादिभिर्घनैः परीतपार्श्वैः परिचारिकाजनः ॥ ८१ ॥

अथागमन्भोज्यगुणातिशायितामनर्घरत्नाभरणौघशिञ्जितैः ।
अमुष्य शंसन्त्य इवाब्जलोचनाः सहेमपात्राः सहसा महानसात् ॥ ८२ ॥

विशिष्य वस्तूनि विरिञ्चिना पुरा कृतानि तेषामपि बुद्धिगौरवात् ।
अनेकता पद्ममुखीभिराहिता ततः कथं तन्महिमा प्रशस्यते ॥ ८३ ॥

पदार्थजातप्रतिपादनक्रमैर्मनोऽनुकूलो मदिरेक्षणाजनः ।
मरुद्द्रुवल्लीमहिमानमावहन्न केवलं किं तु नताङ्गविभ्रमैः ॥ ८४ ॥

अशेषवस्तुप्रकरार्पणक्रमे कराब्जविन्यासविशेषकौशलम् ।
मृगेक्षणानां मणिकङ्कणारवो व्यभात्प्रशंसन्निव तत्प्रभोः पुरः ॥ ८५ ॥

सह प्रियाभिश्चतुरोक्तिपूर्वकं समप्रधानैः सहितानि षड्रसैः ।
अशेषभोज्यानि यथार्हमादरादभुङ्क्त रम्याण्यवनीपुरंदरः ॥ ८६ ॥

चकोरनेत्रानिकरैः समं तदा गलन्तिकासंभृतगन्धवारिणा ।
प्रमृज्य वक्त्रं च शयौ पदद्वयं प्रमोदमानोऽजनि पार्थिवाग्रणीः ॥ ८७ ॥

शतं पदानां शनकैस्तदा व्रजञ्जपन्स रामायणसारसंग्रहम् ।
ततः प्रसादं तुलसीदलं हरेरचर्वदुर्वीपतिरात्तव्रतः ॥ ८८ ॥

वधूसमाजेन करङ्कवाहिना वितीर्यमाणां विनयेन वीटिकाम् ।
अचर्वदामोदकिरां नतोदरीजनेन साकं जगतीसुधाकरः ॥ ८९ ॥

ततो महार्हे धरणीपुरंदरो नृपासने निर्जितपञ्चसायकः ।
अतिष्ठदारादुपेत्य पार्श्वयोरुपाचरन्सादरमुत्पलेक्षणाः ॥ ९० ॥

कनिष्ठिकावेष्टितमुष्टिशाटिका करङ्कवाही करहाटकेशितुः ।
नखाङ्कितं पाण्डरनागवल्लरीदलं सलीलं धरणीभुजेऽदिशत् ॥ ९१ ॥

प्रणम्रसामन्तकिरीटपालिकाप्रकर्षघर्षादिव पाटलं विभोः ।
पदाब्जमासेवत पादपीठिकानिवेशितं पाण्ड्यनृपालकन्यका ॥ ९२ ॥

विभोरपाङ्गांशुसुधाब्धिवीचिषु प्रकूलचाराविव हंसबालकौ ।
प्रमोदतोऽवीजयतां प्रकीर्णके कलिङ्गतुण्डीरनृपालकन्यके ॥ ९३ ॥

शयारविन्दद्वयसाम्यलिप्सया समागतं हेमसरोरुहं यथा ।
अथो नृपालाननदत्तवीक्षणा मणीकलाचीं मगधेन्द्रनन्दना ॥ ९४ ॥

गतेषु चोरं कलहंसमात्मनो निवेदयन्तीव नृपाय संमुखे ।
गलन्तिकां काञ्चनहंसरूपिणीमधाद्विदर्भावनिपालकन्यका ॥ ९५ ॥

कुरुकाशकरूशकोसलान्ध्रप्रमुखक्ष्मापतिकन्यकाः प्रवीणाः ।
अवनीशवतंसमर्हकृत्यैरुदयन्मोदमुपाचरन्सलीलम् ॥ ९६ ॥

समययोग्यकलाः सकलाः पुरः प्रकटयत्यतुलं प्रमदाजने ।
बहुविधाभरणैर्विरुदैरपि प्रभुरसौ परिलालयति स्म तम् ॥ ९७ ॥

राजति प्रतिदिशं रघुनाथक्षोणिपालमहसि क्षुभितात्मा ।
अस्तभूरिवसुरम्बुजबन्धुः प्राप पाण्ड्य इव पश्चिमशैलम् ॥ ९८ ॥

भास्वता प्रविशताथ पयोधिं पावकाय निजभानुकदम्बम् ।
अर्पितं यदपराचलशृङ्गे वीक्ष्यते तदिह सांध्यविभेति ॥ ९९ ॥

विप्रयोगविधुरेण विधूतैश्चक्रवाकमिथुनेन समन्तात् ।
पक्षसंभृतपयोजपरागैः सांध्यरागवपुषा समभावि ॥ १०० ॥

अङ्कुरस्त्वधिमनो विरहाग्नौ चक्रवाकयुगलीसमुदायः ।
प्राप्तलक्षसमपक्षसमीरैः प्राप्स्यतीति किमसौ परिवृद्धः ॥ १०१ ॥

नायकाभिगमनाय निशायाः सायमण्डनसमुत्सुकितायाः ।
मेखलामधुरबन्धुरनादः प्रौढतामधित पक्षिविरावः ॥ १०२ ॥

इत्वरीजनहिताय सखीभिः सत्वरं सपदि नीलपटीनाम् ।
पालिकेव परितः परिक्लृप्ता भासते स्म तमसां परिपाटी ॥ १०३ ॥

नीलनीरजरजोनिकुरुम्बं तर्कयामि हृदि गाढतमिस्रम् ।
अन्यथा किमु भजेदभिवृद्धिं पश्चिमाम्बुधिगते सति भानौ ॥ १०४ ॥

चक्रचञ्चुमुखचर्वितशेषा विप्रयोगसमये प्रविशीर्णाः ।
अन्तरिक्षमभितः परिलक्ष्याः केवलं बिसलवाः किमु ताराः ॥ १०५ ॥

प्राग्दिशं हिमरुचौ प्रतिपन्ने स्वैरिणीनयनतामरसानि ।
कातरत्वमभजन्त कथं वा सह्यते हृदि विपक्षसमृद्धिः ॥ १०६ ॥

उन्मिषत्युदयसीम्नि हिमांशावुद्यदारवमथोत्पलिनीषु ।
भृङ्गपङ्क्तिरवलत्प्रियवार्तां शंसितुं व शनकैः समुपेत्य ॥ १०७ ॥

अग्रतः स्फुरदखण्डदीपिकामण्डली जलधिकन्यकामणेः ।
विन्दते स्म समतां तदेन्दिरामन्दिराङ्गणमणीगणश्रिया ॥ १०८ ॥

सौधाभ्यन्तरयन्त्रकल्पनचलत्पाञ्चालिकाप्रस्तुते
तत्सेवासमयप्रमाणघटिकापर्याप्तिघण्टारवे ।
सायाहन्यथ दीपिकाङ्कितकरैः संसेवितं स्त्रीजनैः
सानन्दं नमति स्म भूमितनुभूजानिं स भूपाग्रणीः ॥ १०९ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये एकादशः सर्गः

---

## द्वादशः सर्गः

अथ लास्यकलावलोकनेच्छोरवनीनेतुरपाङ्गसंज्ञयैव ।
चतुराः समुपेत्य नाट्यशालां सहसाकुर्वत सज्जितार्हकृत्याम् ॥ १ ॥

महार्हमुक्तामणिकॢप्तमालिकावितानसंवीतवितानलक्षिताम् ।
समग्रकालागरुधूपसज्जनां मनोज्ञनानामणिजालजालिकाम् ॥ २ ॥

दलत्प्रसूनाङ्कितदामसौरभीमिलन्मिलिन्दारवमेदुरोदराम् ।
सलीललास्यक्रमचङ्क्रमोचितप्रकॢप्तकर्पूरपरागभासुराम् ॥ ३ ॥

विरचितसमयानुकूलवेषः सविधलसत्सवयःसुधीसहस्रः ।
सरसिजनयनाशतैः समेतो नरपतिमौलिरगात्स नाट्यशालाम् ॥ ४ ॥

स तत्र नानाविधसंविधानमनोहरायां मदनावतारः ।
अध्यास्त भद्रासनमक्षिजातं विलोककानां सफलं वितन्वन् ॥ ५ ॥

काश्मीरकाम्भोजकरूशकाशगांधारकर्नाटकलिङ्गवङ्गाः ।
अवन्तिकुन्त्यान्ध्रविदर्भगौलबङ्गालनेपालकबाह्लिकाङ्गाः ॥ ६ ॥

मत्सिल्लमत्स्यमरहाटसुराष्ट्रलाटतुण्डीरचेरुकुरुकेरलपाण्ड्यघोटाः ।
सिन्धुत्रिगर्तशकसिंहलपारसीकसौवीरमालववराटधराधिनाथाः ॥ ७ ॥

कविकोविदवन्दिगायकाद्या रसिकास्ते रघुनाथपार्थिवेन्दोः ।
अवलोकनसंज्ञयावनम्रा न्यविशन्तात्र निजोचितस्थलेषु ॥ ८ ॥

आशाभागादागतैरत्युदग्रैर्भूमीपालैः पूरितास्थानसीमा ।
प्राकाशिष्ट क्षोणिपालः स तस्यामाशाधीशैराश्रितो वा महेन्द्रः ॥ ९ ॥

अथ तालधराङ्गनादिभिः समुपेता वनसालभञ्जिकाः ।
सममारचयञ्जनेशितुः सविधे वंशविधादिचातुरीम् ॥ १० ॥

मदवतीवलयारवमांसला मुखरमर्दलमोहननिस्वना ।
अतनुतागरुधूपपरंपरा घनघनाघनगर्जितनाटिकाम् ॥ ११ ॥

अथ यथोचितहाटककल्पनां प्रभुमणेः पुरतः प्रतिसीरिकाम् ।
अवहतामरविन्दविलोचने करवलन्मणिकङ्कणनिक्वणम् ॥ १२ ॥

प्रथमं प्रतिसीरिकान्तराले नरनाथाय नटीप्रवेशलीलाम् ।
अवदन्विरुदाङ्कवाद्यनादैर्मणिपादाङ्गदमञ्जुशिञ्जितानि ॥ १३ ॥

अथाहृतायां प्रतिसीरिकायामालक्ष्यमाणा हरिणायताक्षी ।
सांध्यप्रभासंश्लथनेन सद्यः साक्षात्कृतेवाजनि चन्द्ररेखा ॥ १४ ॥

मनोज्ञमुक्तामणिकङ्कणप्रभाभरेण साकं प्रसवाञ्जलिं पुरः ।
अदात्तदा नाट्यकलाधिदेवता मनोहरा रूपवतीव मानिनी ॥ १५ ॥

विलोकनादेव विभोर्विशिष्य विलासिनी संभृतविभ्रमाभूत् ।
वसन्तसांनिध्यवशादतीव मनोहरा माधविकालतेव ॥ १६ ॥

विभुमणेरथ वीक्षणसंज्ञया विधुमुखी समयोचितविभ्रमा ।
अभिनयानतिविस्मयनोचितान्बहुविधं प्रकटीकुरुते स्म सा ॥ १७ ॥

अथ रम्यतरैर्निजाङ्गहारैरपि नाट्यक्रमवेदितात्मभावैः ।
हृदये रुचिमेधितामतानीन्मदिराक्षी रघुनाथमन्मथस्य ॥ १८ ॥

सविधसीम्नि सरोजदृशः शनैर्नटति चारुतरं नयनाञ्चले ।
महिपतेरथ मानसमादरादतनुतातनुरागमहो नवम् ॥ १९ ॥

कुलेन रूपेण गुणेन विद्यया परस्परं साम्यजुषः परःशताः ।
अनर्तिषुर्दृष्टिमुखैरणूदरा स्यादहंपूर्विकया रसोत्तरम् ॥ २० ॥

अपाङ्गशोभातिशये पयोदवद्विजृम्भमाणे सति भूविभोस्तदा ।
विलोलसल्लास्यविलासलक्षिता मयूरिकेवाजनि मानिनीतरा ॥ २१ ॥

परा नटन्ती प्रभुमेक्ष्य तत्क्षणं जितश्रमा चित्तभुवा स्वयं जिता ।
श्रमाम्बुलेशान्हृदि सात्त्विकाञ्शनैः समावृणोच्चञ्चलहारदामभिः ॥ २२ ॥

चच्चत्पुटाद्यैर्नृपतेः समीपे भवास्यजातैर्नटनप्रपञ्चम् ।
प्रापञ्चयत्पञ्चविधैः सलीलं मृगेक्षणा काचन मार्गतालैः ॥ २३ ॥

जयमङ्गलसिंहलीललीलाजयनिःसारुकचच्चरीत्रिभिन्नैः ।
रतिलीलतुरङ्गलीलरङ्गाभरणानङ्गहरिक्रमादितालैः ॥ २४ ॥

हरिनन्दननन्दिनन्दनाद्यैरपि सूलादिभिरन्यकैश्च तालैः ।
रघुनाथविलासमुख्यलास्यानखिलान्काचिदकल्पयत्सलीलम् ॥ २५ ॥

पार्श्वमूर्धपदबाहुसंयुतासंयुताख्यकरचातुरीयुता ।
स्थायिचारिरसभावदृष्टिभिः पर्यनृत्यदपरा पुरः प्रभोः ॥ २६ ॥

नानामणीघटितहाटकनाट्यशालापर्यन्तयन्त्रितचलत्प्रतिमायमोहैः ।
आपादितेव निवहैरमराङ्गनानां विद्योतते स्म पुरतो नवपुष्पवृष्टिः ॥ २७ ॥

अभिनयनरसानुरूपभारान्मुखरमुखेषु मुदा सभाजनेषु ।
अतुलितकनकाभिषेकमुख्यैः झपदि वधूः समभावयन्महीन्दुः ॥ २८ ॥

बुधचारणवन्दिपूर्वकाणामभिषेकं द्रविणं यथार्हमेव ।
बहुधा रघुनाथपार्थिवोऽदान्निजविश्राणननिर्जितेन्द्रशाखी ॥ २९ ॥

कस्तूरिकाकुङ्कुमगन्धसारकर्पूरवीटीकनकाम्बराद्यैः ।
संभावयन्वीक्ष्य सभान्तरस्थान्प्रास्थापयत्पार्थिवलोकचन्द्रः ॥ ३० ॥

अथेन्दिरामन्दिरमाविशन्मुदा महीमहेन्द्रो महिलाजनैः समम् ।
करेणुभिः कल्पितनैकविभ्रमो गन्धद्विपो रोहणकन्दरं यथा ॥ ३१ ॥

हरिनीलशिलातलेऽतिरीते निवसन्वीक्ष्य निशाकरं नृपालः ।
अथ कर्तुमकाङ्क्षदन्तरङ्गे चतुराभिः सह चन्द्रिकाविहारम् ॥ ३२ ॥

मौलिकॢप्तसुममाल्यवेष्टनश्चन्द्रसागयुतचन्दनाङ्कितः ।
हारदामवलयातिमोहनो राजते स्म रघुनाथचन्द्रमाः ॥ ३३ ॥

केलीवनेषु कृतकाचलकंधरासु सौधान्तरेषु शशिकान्तसरस्तटेषु ।
संकेतितानि चतुरः शनकैरयासीत्क्रीडास्थलानि नृपतिर्जितकृष्णलीलः ॥ ३४ ॥

आकर्ण्य नाथाभिगमं तदानीं प्रत्येकमालीमुखतः प्रमोदात् ।
अवाप्तसंकेतगृहान्तरालैरभावि सर्वैरबलाकदम्बैः ॥ ३५ ॥

प्रार्थये न पतिमालि चित्रितं किं तु कर्तुमिह केवलं रहः ।
इत्युदीरणपरां तदैकिकामासदत्स दरहासपूर्वकम् ॥ ३६ ॥

प्रार्थितः सखि स पञ्चसायकः सादरं तव समीपमागसत् ।
इत्युदीर्य हसितस्फुटेङ्गितामालिमैक्षत सलज्जमङ्गना ॥ ३७ ॥

सैकतेषु समुपेत्य केनचिन्निर्गते निजसखीजने शनैः ।
व्रीडयानतमुखीं विलासिनीं नर्मगर्भमवदन्नृपाग्रणीः ॥ ३८ ॥

मार्दवे सति परीक्षिते मया चारुगात्रि समता न सह्यते ।
अङ्ककैरधरितानि तावकैः केलिपत्रकुसुमानि कल्पय ॥ ३९ ॥

विश्रुता वदनसौरभी च ते वीटिकासुरभिता च विश्रुता ।
तारतम्यमधुना तयोरयं बोद्धुमिच्छति तथा विधीयताम् ॥ ४० ॥

पाठिताः कलरवाः परं त्वया मञ्जुवाणि न मया परीक्षिताः ।
तत्प्रकारमयि वर्तयाधुना वेद्मि तद्गतविशेषकल्पनम् ॥ ४१ ॥

चक्रवाकयुगचारुवल्गनं नीरजाक्षि निशि नैव वीक्ष्यते ।
तत्प्रकाशयसि चेत्तवेदृशी वैदुषी किमिति वर्ण्यते मया ॥ ४२ ॥

सारसाक्षि मगधैः समावृतं वीतसान्त्वनभये विशेषये ।
तत्र सर्वहरणे त्वयाधुना कल्प्यतां किमपि नूत्नकल्पनम् ॥ ४३ ॥

इत्युदीर्य चतुरामिलाधिभूरङ्गनां पुनरभूषिताङ्गकाम् ।
विभ्रमैः समयविश्रुतैः शनैरातनोदतनुशास्त्रपारगाम् ॥ ४४ ॥

कोकस्तनीतुङ्गकुचावमर्दैरवाप्तकाश्मीरविलेपनाङ्कम् ।
आच्छाद्य वक्षो वसनाञ्चलेन शनैरयासीच्चतुरस्तदन्याम् ॥ ४५ ॥

विलासिनीनैकविधप्रकॢप्तप्रसूनसंजातपरीमलेन ।
सहाभियातं समवेक्ष्य कान्तमवोचदेवं कलुषाशया सा ॥ ४६ ॥

अपूर्वशृङ्गाररसानुभूतिमाचक्षते ते रुचिराङ्गकानि ।
आलोच्यमाने रमणात्र हेमसमागमः संप्रति चन्द्रिकायाः ॥ ४७ ॥

विस्रंसिमाल्यं विरलाङ्गरागमागच्छतस्ते त्वरयान्तिकं मे ।
अभीक दाक्षिण्यमवेक्ष्य चित्ते वाचा कथं संप्रति वर्णयामि ॥ ४८ ॥

वक्तुं त्वयाद्य व्यवसीयते किं विलम्बहेतुर्विदितो मयैव ।
ललाटभागे तव नूत्नलाक्षाविशेषकन्यासविशेष एषः ॥ ४९ ॥

एकां कलामेत्य विधोर्जगत्यां सर्वज्ञतामाप शशाङ्कचूडः ।
कला दधानस्य कथं तवैषा सर्वज्ञता संप्रति वर्णनीया ॥ ५० ॥

विलम्बने नाथ विचारणा ते कार्या न कार्यं कृतमित्यवेहि ।
समीपभाजस्तव सान्द्रचक्षूरागेण यस्माद्वदनं विभाति ॥ ५१ ॥

इति वादिनीं हृदि विचिन्त्य कोपनां रमणीमणीं स रघुनाथनायकः ।
अविदन्निवात्मतरुणापराधितामवदत्तदा वचनमार्द्रमाश्रितः ॥ ५२ ॥

अविचारसारवचनैरतिस्फुटैरवलोकनैरकलिताञ्चितैरपि ।
कुपितेव भासि कुटिलेऽपराधिता मयि वा सखीषु किमु मञ्जुभाषिणि ॥ ५३ ॥

अपराधमाचरितमात्रमेव या सहसे सहेत किमु पञ्चसायकः ।
इति वेद्मि तेन हृदयेऽद्य मा कृथाः परथा मम प्रणयकृत्यमङ्गने ॥ ५४ ॥

अयि पक्षपातमवलम्ब्य तावकं सवयोजनो न हि मयानुनाथितः ।
अत एव तेन हितवन्ममाहितं विहितं तदद्य सुचिरं विचार्यताम् ॥ ५५ ॥

तरलाक्षि संप्रति तव प्रसादतोऽप्यवधीरणं वरमवैमि मानसे ।
अवलोकनैर्विजितमन्मथाशुगैरवलोकसे यद्विभाव्यतर्जनैः ॥ ५६ ॥

इति सान्त्वनैर्हृदयमोदनैः शनैरनुनीय गाढपरिरम्भणादिभिः ।
रमणीमणीं स रतिशास्त्रचोदितै रसिकाग्रणी रमयति स्म सादरम् ॥ ५७ ॥

अभ्यागमं स्वं परिपाल्य हर्षादात्मानमभ्यासदनं सखीभिः ।
आकल्पयत्तामपरां नताङ्गीमथासदद्भूरमणावतंसः ॥ ५८ ॥

निसर्गरम्याणि निजाङ्गकानि परिष्क्रियाभिर्बहुमन्यसे किम् ।
अयि त्रिलोक्याभरणानि तानि परिष्क्रियायाश्च परिष्क्रियैव ॥ ५९ ॥

अलंक्रिया स्यात्त्वदपेक्षयान्या विलासगेहस्य विलोलनेत्रे ।
इतीरयन्नीषदुदीतहासं जनाधिनाथः समभावयत्ताम् ॥ ६० ॥

अथ व्रजन्भूपकुलावतंसस्तस्यान्तिके केलिवनीसमीपे ।
अन्यामयासीदरविन्दवक्त्रां लतागृहे नूतलताभिरामाम् ॥ ६१ ॥

प्रसूनगुच्छस्तनभारनम्रामुद्गूढनूत्नोत्कलिकाविशेषाम् ।
आमोदितां तामतनोन्महीन्दुर्वल्लीं यथा माधविकां वसन्तः ॥ ६२ ॥

अमर्षवेगादवधीर्य पश्चात्तापान्वितां केलितडागसीम्नि ।
अन्यामयासीदनुमन्यमानः सखीजनेनाथ जनाधिनाथः ॥ ६३ ॥

उद्यन्नवीनोत्पलगर्भभागपरागयोगात्परिपांसुलासु ।
चन्द्राश्मवेदीषु शनैररंस्त स राजचन्द्रश्चतुरं मृगाक्ष्या ॥ ६४ ॥

संकेतिते सौधगृहे चरन्तीं पराङ्गनाकेलिपरायणं स्वम् ।
आलोच्य चिन्तासहितामयासीदन्यां तदानीमवनीसुधांशुः ॥ ६५ ॥

विलम्बहेतून्विविधान्निगद्य पयोरुहाक्ष्या हृदयं प्रसाद्य ।
विख्यातशृङ्गारकलाविलासैरलालयत्तां विभुरादरेण ॥ ६६ ॥

विहृत्य वीथीषु विलासिनीनामायान्तमात्मन्यनमतर्कयित्वा ।
देशान्तरस्थं प्रविशङ्क्य दीनामन्यामयासीद्विभुराननाङ्गीम् ॥ ६७ ॥

आलिङ्गनैः प्रेमरसातिगाढैराभाषणैरप्यमृतायमानैः ।
अयोगसंतापमपास्य नेता प्राकल्पयत्प्राप्तमनोरथां ताम् ॥ ६८ ॥

कुलशीलगुणाभिरूप्यलीलाविभवैः स्वं सततं विधेयमेव ।
अबलां सविशेषमादधानामपरां भूमिपतिः शनैरयासीत् ॥ ६९ ॥

प्रमदानुगुणं स पार्थिवेन्दुः प्रमदायाश्चतुरः प्रसाधनादीन् ।
विरचय्य मनोहरैर्विलासैरभजत्केवलमाश्रवत्वमस्याः ॥ ७० ॥

अथासदङ्घ्रिविभुरात्मलीलाविशेषसंजल्पनविभ्रमोत्कैः ।
परिष्कृतानि प्रमदाकदम्बैः स्वचन्द्रशालासविधाङ्गणानि ॥ ७१ ॥

विलासिनीनां विविधैः कटाक्षैर्विलोकितस्तत्र विभुर्व्यलासीत् ।
सद्योदलन्नीलसरोजजातैः समर्चितः साङ्ग इवाङ्गजन्मा ॥ ७२ ॥

समयोचितवाद्यसंविधानैर्विविधैर्मोहनगीतिकाविशेषैः ।
महिला रघुनाथमन्मथं तं समसेवन्त तदन्तरे समन्तात् ॥ ७३ ॥

प्रथितमलयकूटप्रांशुकल्याणवेदिप्रतिनवनवरङ्गाभासुरं हेमकूटम् ।
महितनिजविहारैर्मानयन्मानिनीभिर्महिपमणिरयासीदिन्दिरामन्दिरं तत् ॥७४॥

मनोहरे तत्र महीपुरंदरः प्रसूनशय्यादिपरिष्क्रियाचिताम् ।
अथाध्यवात्सीन्मणिदोलिकां चिरं प्रपेक्ष्यमाणोऽथ नितम्बिनीजनैः ॥ ७५ ॥

मनोज्ञनानामणिपात्रक्लृप्तपाटीरवीटीप्रसवादिमानि ।
सुगन्धिवस्तूनि सुमध्यमाभ्यः प्रादात्प्रमोदात्प्रभुरुर्वरायाः ॥ ७६ ॥

कर्णामृतं गीयति गायनीजने संवेशसौख्यं समवाप्य भूविभुः।
ब्राह्मे मुहूर्ते परिबोधमादधात्प्राभातिकै रागरसप्रपञ्चनैः ॥ ७७ ॥

प्रबोधमानं प्रवरं रघूणां ध्यायन्तमन्तर्धरणीमहेन्द्रम् ।
संवेशभाजं समवेक्ष्य कान्ताः प्राबोधयन्मागधवत्प्रगल्भाः ॥ ७८ ॥

सुरतान्ततान्तसुमुखीपरंपरातनुवल्गनादधरिता लता इव।
मदनावतार मणिमञ्चिकान्तरं परितो विभान्ति सुमदामपालिकाः ॥ ७९ ॥

समतां तव नेत्रयोः समेतुं सरसीजानि समीपदीर्घिकायाम् ।
विकसन्ति विलोलमत्तभृङ्गव्यतिषङ्गस्पृहणीयविभ्रमाणि ॥ ८० ॥

शय्योत्तरच्छदसुमानि शरीरभागव्यासञ्जितानि मृदुलेन विवेष्टनेन ।
सौरभ्यमार्दवगुणौ समवैतुमेतत्सेवादिदानचतुरा न यथा विभान्ति ॥ ८१ ॥

अवनीश्वरास्सदनुकारिणीव ते समयप्रबोधनविधौ समुत्सुका।
नलिनी सलीलमलिनीकुलस्वनैरभिलक्ष्यते भवनदीर्घिकान्तरे ॥ ८२ ॥

इति वादिनीषु हरिणेक्षणामणीष्वथ रामभद्रमभिपूज्य मानसे ।
विनतिं तदाच्युतविभोः प्रकल्पयन्नुदतिष्ठदेष शयनादुदारधीः ॥ ८३ ॥

नवरत्नचन्दननवीनमालिकातपनीयपूर्णघटदर्पणादिमम् ।
अभिजातवस्तुचयमैक्षताधिके जयशङ्खभेरिनिनदे जनाधिपः ॥ ८४ ॥

अथ कृत्यमहर्मुखप्रशस्तं विरचय्यागमविश्रुतं यथावत् ।
मणिभूषणभूषितो महार्हामवनीपालमणिः सभामयासीत् ॥ ८५ ॥

कलिङ्गबाह्लिकाङ्गवङ्गकाशपाण्ड्यकोसलक्ष्माधिनाथयूथकॢप्तचामरादिवैभवः ।
प्रणम्य राघवं प्रभुं प्रमोदमानमानसः स सिंहपीठिकान्तरं समासदत्क्ष्माविभुः॥

आशीताद्रीन्द्रसेतुक्षितितलवलयायातराजन्यजात-
प्राञ्चत्कोटीरकोटिप्रगुणमणिगणप्रांशुदीप्रांशुदीपैः ।
आरादारात्रितातिस्फुटपदकटकद्योतमानो रघूणां
नेता त्रेतावदेतां क्षितिमिह रघुनाथेन्दुरिन्द्रेऽभिरक्षन् ॥ ८७॥

आचन्द्रतारमतुलं रघुनाथभूपे विश्वंभरामवति विश्वजनीनकीर्तौ ।
आसन्प्रजा गजतुरंगमहाटकाङ्कपर्यङ्किकामकुटकुण्डलभासमानाः ॥ ८८ ॥

अधिकश्रियमच्युतेन्द्रसूनुं रघुनाथं रघुनाथमेव साक्षात् ।
हृदये कलयन्ति ये महान्तः परमानन्दभरास्त एव धन्याः ॥ ८९ ॥

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्धमानशतलेखिनी-
समसमयलेखनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणित-
साहित्यसाम्राज्यभद्रपीठारूढरामभद्राम्बाविरचिते
रघुनाथाभ्युदये महाकाव्ये द्वादशः सर्गः

समाप्तोऽयं ग्रन्थः

---

OFFICE OF THE DIRECTOR OF ARCHAEOLOGY
15 MAR 1972
GOVT. OF A.P.
2798

15MAR1972

2798

# MADRAS UNIVERSITY SANSKRIT SERIES

## WORKS ALREADY PUBLISHED

| | | | | |
|---|---|---|---|---|
| Ṛgvedānukramaṇī of Mādhavabhaṭṭa ... | Rs. | 3 | 8 | 0 |
| Sphoṭasiddhi of Maṇḍanamiśra ... ... | ,, | 3 | 0 | 0 |
| Taittirīyaprātiśākhya with Māhiṣeya Bhāṣya ... | ,, | 2 | 0 | 0 |
| Liṅgānuśāsana of Harṣavardhana... ... | ,, | 1 | 8 | 0 |
| Uṇādisūtravṛtti of Śvetavanavāsin ... | ,, | 3 | 0 | 0 |
| Uṇādisūtravṛtti of Nārāyaṇa ... ... | ,, | 2 | 8 | 0 |
| Bṛhatī with Ṛjuvimalā [Tarkapāda] ... ... | ,, | 5 | 0 | 0 |
| Vājasaneyiprātiśākhya with two commentaries ... | ,, | 4 | 0 | 0 |
| Uṇādisūtravṛtti of Durgasimha and Bhoja ... | ,, | 3 | 0 | 0 |
| Sāhityaratnākara (Bulletin) ... ... | Re. | 1 | 0 | 0 |
| Raghunāthābhyudaya (Bulletin) ... ... | ,, | 1 | 0 | 0 |

## IN THE PRESS

Ṛgvedabhāṣya by Skandasvāmin [1st Aṣṭaka].

Brahmasūtrabhāṣya with the Prakaṭārthavivaraṇa.

Mīmāṁsābhāṣyapariśiṣṭa by Śālikanātha.

Sarasvatīkaṇṭhābharaṇa of Bhoja (Bulletin).

Daśapādīvṛtti.

Mīmāṁsānayaviveka with the commentary of Ravideva [Tarkapāda]

Mīmāṁsāślokavārtika with the commentary of Umveka.

Auṇādikapadārṇava of Veṅkaṭeśvara.

Fragments of Hārīta Dharmasūtra (Bulletin).